विद्याविनयसम्पन्नो वर्धते पितृवेश्मनि । सतां सङ्गेन स भवेत् सर्वागमविशारदः ॥२१॥
दिव्याङ्गनादिभोक्ता स्यात् तारुण्ये दानवान् धनी । पूर्वं कृततपस्तीर्थ - महापुण्य - फलोदयात् ॥२२॥
ततश्च यतते नित्यमात्मानात्मविचारणे । अध्यारोपापवादाभ्यां कुरुते ब्रह्मचिन्तनम् ॥२३॥
अस्यासङ्गावबोधाय ब्रह्मणो - ऽन्वयकारिणः । क्षित्याद्यनात्मवर्गस्य गुणांस्ते कथयाम्यहम् ॥२४॥
क्षितिर्वारि हविर्भोक्ता वायुराकाश एव च । स्थूलभूता इमे प्रोक्ताः पिण्डोऽयं पाञ्चभौतिकः॥२५॥

रहेको पुण्यात्मा पुत्र परम आनन्द दिने हुन्छ । त्यसका समस्त पुंसवनादिक क्रिया पनि हुन्छन् ॥ १६ ॥ पुण्यात्मा; ग्रहहरू उच्च भएका वखत जन्म पाउँदछ र त्यसका जन्म समयमा ब्राह्मणहरू धेरै धन पाउँदछन् ॥ २० ॥ विद्या र विनयले युक्त भएको त्यो पुरुष पिताका घरमा बढ्दछ र सज्जनहरूका सङ्गले गर्दा त्यो सबै शास्त्रमा चतुर हुन्छ ॥ २१ ॥ पूर्वजन्ममा गरेका तप, तीर्थ र महापुण्यहरूको फलोदय हुनाले तारुण्यावस्थामा त्यो दयावान् धनी र दिव्य स्त्रीहरू भोग गर्ने हुन्छ ॥ २२ ॥ त्यसपछि आत्मा र अनात्माका विचारमा सधैं यत्न गर्दछ र अध्यारोप र अपवाद द्वारा ब्रह्मको चिन्तन गर्दछ ॥ २३ ॥ क्षित्यादिका साथ अन्वय गर्ने भएका ब्रह्मलाई सङ्ग रहित जान्नाका निमित्त क्षित्यादि अनात्म जो पञ्च-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्वारा ब्रह्मको चिन्तन गर्दछ ॥ २३ ॥ क्षित्यादिका साथ ... आत्माका निमित्त क्षित्यादि अनात्म जो पञ्च-

CC-0. In Public Domain. Digitization by eGangotri Funding: MDF

त्वगस्थिनाड्यो रोमाणि मांसं चैव खगेश्वर ! एते पञ्चगुणा भूमेर्मया ते परिकीर्तितः ॥२६॥
लाला मूत्रं तथा शुक्रं मज्जा रक्तं च पञ्चमम् । अपां पञ्च गुणाः प्रोक्तास्तेजसोविनिशामय॥२७॥
क्षुधा तृष्णा तथाऽऽलस्यं निद्रा कान्तिस्तथैव च । तेजः पञ्चगुणं तार्क्ष्य ! प्रोक्तं सर्वत्र योगिभिः॥२८॥
आकुञ्चनं धावनं च लङ्घनं च प्रसारणम् । चेष्टितं चेति पञ्चैव गुणा वायोः प्रकीर्तिताः॥२९॥
घोषश्चिन्ता च शून्यत्वं मोहचिन्ता च संशयः । आकाशस्य गुणाः पञ्च ज्ञातव्यास्ते प्रयत्नतः॥३०॥
मनो - बुद्धि - रहङ्कारश्चित्तं चेति चतुष्टयम् । अन्तःकरणमुद्दिष्टं पूर्वकर्माधिवासितम् ॥३१॥

भूतबाट बनियो ॥ २५ ॥ छाला, हाड़, नाड़ी, रऊँ र मासु यी पृथिवीका पाँच गुण हे गरुड ! मैले तिमीलाई बताएँ ॥ २६ ॥ राल, मूत्र, वीर्य बोसो र रगत यी जलका पाँच गुण कहिए । तेजका गुण पनि सुन ॥ २७ ॥ हे गरुड ! भोक, प्यास, आलस्य, निद्रा र कान्ति यी तेजका पाँच गुण सर्वत्र योगीहरूले कहेका छन् ॥ २८ ॥ खुम्च्याउनु, दौड़नु, नाघ्नु, पसार्नु र चेष्टा गर्नु यी पाँच गुण वायुका कहिए ॥ २९ ॥ शब्द, चिन्ता शून्यत्व, मोह र सन्देह यी आकाशका पाँच गुण तिमीले प्रयत्नपूर्वक जान्नामा योग्य छन् ॥ ३० ॥ मन, बुद्धि, अहङ्कार, चित्त यी चार र अन्तः-करण पनि पूर्वजन्मका कर्महरू द्वारा अधिवासित वासना युक्त छन् ॥ ३१ ॥ कान, छाला, आँखा, जिब्रो र नाक यी ज्ञानेन्द्रिय हुन् । वाक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं ज्ञानेन्द्रियाणि च । वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि च॥३२॥
दिग्वातार्क - प्रचेतोऽश्वि - वह्नीन्द्रोपेन्द्र-मित्रकाः । ज्ञानकर्मेन्द्रियाणां च देवताः परिकीर्तिताः ॥३३॥
इडा च पिङ्गला चैव सुषुम्नाख्या तृतीयका । गान्धारी गजजिह्वा च पूषा चैव यशस्विनी॥३४॥
अलम्बुषा कुहूश्चापि शङ्खिनी दशमी तथा । पिण्डमध्ये स्थिता ह्येता प्रधाना दशनाडिकाः॥३५॥
प्राणोऽपानः समानाख्य उदानो व्यान एव च । नागः कूर्मश्च कृकलो देवदत्तो धनञ्जयः ॥३६॥
हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले । उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः ॥३७॥
उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः । कृकलः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे ॥३८॥

पाणि, पाद, गुदा र लिङ्ग यो कर्मेन्द्रिय हुन् ।। ३२ ॥ दिशा, वायु, सूर्य, प्रचेता, अश्विनीकुमार, अग्नि, इन्द्र, उपेन्द्र र मित्र यी ज्ञानेन्द्रिय तथा कर्मेन्द्रियका देवता कहिए ।। ३३ ॥ इड़ा, पिङ्गला र सुषुम्ना नाम गरिएकी तेस्रो गान्धारी, गजजिह्वा, पूषा, यशस्विनी, अलम्बुषा, कुहू र शङ्खिनी यी प्रधान दश नाडी पिण्ड मध्यमा स्थित छन् ।। ३४ ॥ ३५ ॥ प्राण, अपान, समान, उदान, व्यान, नाग, कूर्म, कृकल, देवदत्त र धनञ्जय यी वायु शरीरमा स्थित छन् ।। ३६ ॥ हृदयमा प्राण, गुदामा अपान, नाभिमण्डलमा समान, कण्ठदेशमा उदान र सर्वशरीरमा व्यान स्थित छ ।। ३७ ॥ उद्गार (उगेल्नु) मा नाग कहियो; उन्मीलन अर्थात् हेर्दामा कूर्म सम्झियो; क्षुत्कर गराउने (भोक लगाउने वा छिंका लगाउने कृकल नामक वायु कहियो; विजृम्भण (हाई गर्दा) मा देवदत्त कहियो ।। ३८ ।। सर्वव्यापी धनञ्जय वायु मृत व्यक्तिलाई पनि किञ्चित् काल छाड्दैन। फेरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न जहाति मृतं वापि सर्वव्यापी धनञ्जयः। कवलैर्भुक्तमन्नं हि पुष्टिदं सर्वदेहिनाम् ॥३९॥
नयते व्यानको वायुः सारांशं सर्वनाडिषु। आहारो भुक्तमात्रो हि वायुना क्रियते द्विधा ॥४०॥
संप्रविश्य गुदे सम्यक् पृथगन्नं पृथक् जलम्। ऊर्ध्वमग्ने कृत्वा कृत्वान्नं च जलोपरि ॥४१॥
अग्नेश्चाधः स्वयं प्राणः स्थित्वाग्निं धमते शनैः। वायुना ध्मायमानोऽग्निः पृथक् किट्टं पृथग् रसम् ॥४२॥
कुरुते व्यानको वायुर्विष्वक्सम्प्रापयेद्र रसम्। द्वारैर्द्वादशभिर्भिन्नं किट्टं देहाद् बहिः स्रवेत् ॥४३॥
कर्णाऽक्षिनासिकाजिह्वा दन्ताः नाभिर्नखा गुदम्। गुह्यं शिरा वपुर्लोम मलस्थानानि चक्षते ॥४४॥

गाँसद्वारा खाइएको अन्न सबै प्राणीहरूको पुष्टि दिने हो ॥ ३९ ॥ व्यान वायु खाएका अन्नको सारांश सबै नाडीमा पुऱ्याउँदछ। भुक्त मात्र अन्नादिक वायुले दुई भाग गरिदिन्छ ॥ ४० ॥ गुदामा असल प्रकारले वायु प्रवेश गर्दछ र अन्न-जल अलग-अलग गराउँदछ। अग्निका उपर जल र जलका उपर अन्न गरेर ॥ ४१ ॥ अग्निका मनि स्वयं प्राणवायु बसेर अग्निलाई विस्तार-विस्तार फुक्दछ। वायुले फुकिएको अग्नि मल र रसलाई अलग गर्दछ ॥ ४२ ॥ व्यान वायु सब शरीरमा रस पुऱ्याउँदछ र बाह्र द्वारबाट वायुले भिन्न गरिएको मल शरीरबाट बाहिर निकाल्दछ ॥ ४३ ॥ कान, आँखा, नाक, जिब्रो, दाँत, नाभि, नङ, गुदा, लिङ्ग र शिरा (पश्चाद्ग्रीवा शिरा मन्या नाडी तु धमनिः शिरा—इत्यमरः) रौं यो मलस्थान कहिएका छन् ॥ ४४ ॥ यस्ता प्रकारले सबै वायु आफ्ना-आफ्ना कर्ममा प्रवृत्त हुन्छन्। जस्तै—मनुष्यहरू सूर्यको प्रकाश पाएर आफ्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं सर्वे प्रवर्तन्ते स्वस्वकर्मणि वायवः । उपलभ्यात्मनः सत्तां सूर्यालोकं यथा जनाः ॥४५॥
इदानीं नरदेहस्य शृणु रूपद्वयं खग ! व्यावहारिकमेकं च द्वितीयं पारमार्थिकम् ॥४६॥
तिस्रः कोट्योऽर्धकोटी च रोमाणि व्यावहारिके । सप्तलक्षाणि केशाः स्युर्नखाः प्रोक्तास्तु विंशतिः ॥४७॥
द्वात्रिंशद् दशनाः प्रोक्ताः सामान्याद् विनतासुत ! मांसं पलसहस्रं तु रक्तं पलशतं स्मृतम् ॥४८॥
पलानि दश मेदस्तु त्वक्पलानि च सप्ततिः । पलद्वादशकं मज्जा महारक्तं पलत्रयम् ॥४९॥
शुक्रं द्विकुडवं ज्ञेयं कुडवं शोणितं स्मृतम् । षष्ट्युत्तरं च त्रिशतमस्थ्नां देहे प्रकीर्तितम् ॥५०॥
नाड्यः स्थूलाश्च सूक्ष्माश्च कोटिशः परिकीर्तिताः । पित्तं पलानि पञ्चाशत् तदर्धं श्लेष्मणस्तथा ॥५१॥

सत्तामा प्रवृत्त हुन्छन् ॥ ४५ ॥ हे गरुड ! यस बखत नर देहका दुई रूप सुन—एक व्यावहारिक र दोस्रो पारमार्थिक हो ॥ ४६ ॥ व्यावहारिक शरीरमा साढे तीन करोड़ रौं, सात लाख केश र बीस नङ कहिएका छन् ॥ ४७ ॥ हे गरुड ! सामान्यमा मनुष्यका बत्तीस दाँत कहिए । हजार पल (४००० तोला) मासु र पलशत (४०० तोला) रगत कहिएको छ ॥ ४८ ॥ दश पल बोसो, ७० पल छाला र बाह्र पल मासी तथा तीन पल महारक्त व्यावहारिक शरीरमा छ ॥ ४९ ॥ शरीरमा दुई कुड़व वीर्य जान्नू ; शोणित एक कुड़व जान्नू—यो स्त्रीका शरीरमा पनि कहियो फेरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDE

सततं जायमानं तु विण्मूत्रं चाप्रमाणतः। एतद्गुणसमायुक्तं शरीरं व्यावहारिकम् ॥५२॥
भुवनानि च सर्वाणि पर्वतद्वीपसागराः। आदित्याद्या ग्रहाः सन्ति शरीरे पारमार्थिके ॥५३॥
पारमार्थिकदेहे हि षट्चक्राणि भवन्ति हि। ब्रह्माण्डे ये गुणाः प्रोक्तास्तेऽप्यस्मिन्नेव संस्थिताः॥५४॥
तानहं ते प्रवक्ष्यामि योगिनां धारणास्पदान्। येषां भावनया जन्तुर्भवेद्वै राजरूपभाक् ॥५५॥
पादाधस्तात् तलं ज्ञेयं पादोर्ध्वं वितलं तथा। जानुनोः सुतलं विद्धि सक्थिदेशे महातलम् ॥५६॥
तलातलं सक्थिमूले गुह्यदेशे रसातलम्। पातालं कटिसंस्थं च सप्तलोकाः प्रकीर्तिताः ॥५७॥

पल कफ कहियो ॥ ५१ ॥ सधैं उत्पन्न हुने विष्टा र मूत्रको ता केही प्रमाण छैन। यी सब गुणले युक्त भएको व्यावहारिक शरीर हो ॥ ५२ ॥ सब भुवन, पर्वत, द्वीप, सागर र आदित्य आदि ग्रह यी सब पारमार्थिक शरीरमा बसेका छन् ॥ ५३ ॥ पारमार्थिक देहमा षट् चक्र हुन्छन्। ब्रह्माण्डमा जो गुण कहिए ती सब शरीरमा अर्थात् व्यावहारिक शरीरमा स्थित छन ॥ ५४ ॥ योगीहरूका धारणाका स्थान स्वरूप भएका ती सब गुण म तिमीलाई बताउँदछु—जसको भावना गर्दा जन्तु बिराट रूपकन प्राप्त गर्दछ ॥ ५५ ॥ अब विराट् स्वरूपको वर्णन गरिन्छ—पाउदेखि मनि तल लोक जान्नू; पाउदेखि माथि वितल लोक र घुँडामा सुतल; जाँघ र तिघ्रामा महातल एवं तिघ्राका जोर्नीमा तलातल; गुह्यदेशमा रसातल फेरि कटि प्रदेशमा पाताल लोक छ। यी सात लोक कहिए ।५६॥ ५७॥ नाभि मध्यमा भूलोक र त्यसदेखि मास्तिर भुवर्लोक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूर्लोकं नाभिमध्ये तु भुवर्लोकं तदूर्ध्वके। स्वर्लोकं हृदये विद्यात् कण्ठदेशे महस्तथा ॥५८॥
जनलोकं वक्त्रदेशे तपोलोकं ललाटके। सत्यलोकं ब्रह्मरन्ध्रे भुवनानि चतुर्दश ॥५९॥
त्रिकोणे संस्थितो मेरुरधः कोणे च मन्दरः। दक्षकोणे च कैलाशो वामकोणे हिमालयः ॥६०॥
निषधश्चोर्ध्वरेखायां दक्षायां गन्धमादनः। रमणो वामरेखायां सप्तैते कुलपर्वताः ॥६१॥
अस्थिस्थाने भवेज्जम्बूः शाको मज्जासु संस्थितः। कुशद्वीपः स्थितो मांसे क्रौञ्चद्वीपः शिरासु च ॥६२॥
त्वचायां शाल्मलीद्वीपो गोमेदो रोमसञ्चये। नखस्थं पुष्करं विद्यात् सागरास्तदनन्तरम् ॥६३॥
क्षारोदो हि भवेन्मूत्रे क्षीरे क्षीरोदसागरः। सुरोदधिः श्लेष्मसंस्थो मज्जायां घृतसागरः॥६४॥

स्वर्लोक चाहिं हृदयमा जान, कण्ठदेशमा महर्लोक विचार गर ॥ ५८ ॥ मुख प्रदेशमा जनलोक, ललाटमा तपोलोक र ब्रह्मरन्ध्रमा सत्यलोक थी १४ भुवन कहिए ॥ ५९ ॥ त्रिकोणमा मेरु पर्वत, अधःकोणमा मन्दराचल, दक्षिण कोणमा कैलाश, वाम कोणमा हिमालय पर्वत छन् ॥ ६० ॥ ऊर्ध्व रेखामा निषध पर्वत; दक्षिण रेखामा गन्धमादन र वामरेखामा रमणाचल यी सात कुल पर्वत विराट् स्वरूप भगवान्‌का शरीरमा कहिए ॥ ६१ ॥ हाड्का स्थानमा जम्बूद्वीप छ- मज्जा स्थानमा शाकद्वीप छ र मासुमा कुशद्वीप. नाडीमा क्रौञ्चद्वीप, छालामा शाल्मलीद्वीप, रोमसमूहमा गोमेदद्वीप र नङ स्थित पुष्करद्वीप जान। यसपछि समुद्र पनि सुन ॥ ६२ ॥ ६३ ॥ मूत्रमा क्षार समुद्र; दूधमा दूधको समुद्र, कफमा मदिराको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ६२ ॥ हाड़को स्थानमा जम्बूद्वीप छ- मज्जा स्थानमा शाकद्वीप छ र मासुमा कुशद्वीप. नाडीमा क्रौञ्चद्वीप, छालामा शाल्मलीद्वीप, रोमसमूहमा गोमेदद्वीप र नङ स्थित पुष्करद्वीप जान। यसपछि समुद्र पनि सुन ॥ ६२ ॥ ६३ ॥ मूत्रमा क्षार समुद्र; दूधमा दूधको समुद्र, कफमा मदिराको

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रसोदधिं रसे विद्याच्छोणिते दधिसागरः। स्वादूदो लम्बिकास्थाने जानीयाद् विनतासुत ॥६५॥
नादचक्रे स्थितः सूर्यो विन्दुचक्रे च चन्द्रमाः। लोचनस्थः कुजो ज्ञेयो हृदये ज्ञः प्रकीर्तितः ॥६६॥
विष्णुस्थाने गुरुं विद्याच्छुक्रे शुक्रो व्यवस्थितः। नाभिस्थाने स्थितो मन्दो मुखे राहुः प्रकीर्तितः॥६७॥
वायुस्थाने स्थितः केतु शरीरे ग्रहमण्डलम्। एवं सर्वस्वरूपेण चिन्तयेदात्मनस्तनुम् ॥६८॥
सदा प्रभातसमये बद्धपद्मासनः स्थितः। षट्चक्रचिन्तनं कुर्याद् यथोक्तमजपाक्रमम् ॥६९॥
अजपानाम गायत्री मुनीनां मोक्षदायिनी। अस्याः सङ्कल्पमात्रेण सर्वपापैः प्रमुच्यते ॥७०॥
शृणु तार्क्ष्य! प्रवक्ष्येऽहमजपाक्रममुत्तमम्। यं कृत्वा सर्वदा जीवो जीवभावं विमुञ्चति ॥७१॥

कण्ठ भित्र छ त्यस स्थानमा जान ॥ ६४ ॥ ६५ ॥ नादचक्रमा सूर्य स्थित छन् र विन्दुचक्रमा चन्द्रमा, लोचनस्थ मङ्गल जान्नू र हृदयमा बुध कहिएका छन् ॥ ६६ ॥ विष्णु स्थानमा नाभिमण्डल गुरु जान; वीर्य स्थानमा शुक्र बसेका जान ; नाभि स्थानमा शनैश्चर र मुखमा राहु कहिएका छन् ॥ ६७ ॥ वायु स्थानमा केतु स्थित छ। यस प्रकार शरीरमा ग्रह-मण्डल जान्नू। यस्ता प्रकारले आफ्ना शरीरको चिन्तन गरोस् ॥ ६८ ॥ सधैँ प्रभात समयमा पद्मासन बाँधेर स्थित भएको हुँदो षट्चक्रको र अजपा गायत्रीका क्रमको चिन्तन गरोसू ॥ ६९ ॥ मुनिहरूलाई मोक्ष दिने भएकी अजपा नाम गरिएकी गायत्री छन् तिनको जप गर्दछु भनी सङ्कल्प गर्नाले मात्र पनि सबै पापदेखि छुट्तछ ॥ ७० ॥ हे गरुड! सुन—अजपा गायत्रीको उत्तम क्रम बताउँदछु जुन कर्म गरेर जीव सधैँ जीव भावलाई छोड्दछ ॥ ७१ ॥ मूलाधार, स्वाधिष्ठान, मणिपूरक, अनाहत, विशुद्धाख्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूलाधारं स्वधिष्ठानं मणिपूरकमेव च। अनाहतं विशुद्धाख्यमाज्ञाषट्चक्रमुच्यते ॥७२॥
मूलाधारे लिङ्गदेशे नाभ्यां हृदि च कण्ठगे। भ्रुवोर्मध्ये ब्रह्मरन्ध्रे क्रमाच्चक्राणि चिन्तयेत् ॥७३॥
आधारं तु चतुर्दलानलसमं वासान्तवर्णाश्रयं स्वाधिष्ठानमपि प्रभाकरसमं बालान्तषट्पत्रकम् ॥
रक्ताभं मणिपूरकं दशदलं जाड्यं फकारान्तकं पत्रैर्द्वादशभिरनाहतपुरं हैमं कठान्तावृतम् ॥७४॥
पत्रैः सस्वरषोडशैः शशधरज्योतिर्विशुद्धाम्बुजं हंसेत्यक्षरयुग्मकं द्वयदलं रक्ताभमात्राम्बुजम् ॥
तस्मादूर्ध्वगतं प्रभासितमिदं पद्मं सहस्रच्छदं सत्यानन्दमयं सदाशिवमयं ज्योतिर्मयं शाश्वतम् ॥७५॥

र आज्ञा यी षट्चक्र कहिएका छन् ॥ ७२ ॥ मूलाधारमा, लिङ्गदेशमा. नाभिमा· हृदयमा. कण्ठमा. दुइ भ्रूका मध्यमा र ब्रह्मरन्ध्रमा क्रमले चक्रहरूको चिन्तन गरोस् ॥ ७३ ॥ (अव षट्चक्र यस्तो छ र यसरी चिन्तन गर्नुपर्दछ भन्ने वर्णन गरिन्छ)॥ आधार स्थान कमलका चार पातले युक्त भएको अग्निको जस्तो कान्ति भएको व देखि ससम्मका वर्णहरूवा॰ो आश्रय भएको छ। स्वाधिष्ठान पनि सूर्यका जस्तो कान्ति भएको व देखि ल सम्मका वर्णहरूले आश्रित भएर कमलका ६ पत्रले युक्त भएको छ ॥ रगतको जस्तो आभा भएको मणिपूरक स्थान कमलका दस पातले युक्त भएको छँदो ड देखि फसम्मका वर्णहरूले आश्रित गरिएको छ; कमलका वाह्र पातले युक्त भएको अनाहत स्थान सुवर्णको जस्तो कान्ति भएको छँदो क इखि ठ सम्मका वर्णहरूले युक्त भएको छ ॥ ७४ ॥ अच् (अ इ उ ऋ लृ ए ऐ ओ औ) अक्षरले सहित भएको सोह्र पातले युक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

छँदो क इखि ठ सम्मका वर्णहरूले युक्त भएको छ ॥ ७४ ॥ अब (...) अक्षरले सहित भएको सोह्र पातले युक्त

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDM

गणेशं च विधिं विष्णुं शिवं जीवं गुरुं ततः । व्यापकं च परं ब्रह्म क्रमाच्चक्रेषु चिन्तयेत् ॥७६॥
एकविंशत्सहस्राणि षट्शतान्यधिकानि च । अहोरात्रेण श्वासस्य गतिः सूक्ष्मा स्मृता बुधैः॥७७॥
हकारेण बहिर्याति सकारेण विशेत् पुनः । हंसो हंसेति मन्त्रेण जीवो जपति तत्त्वतः ॥७८॥
षट्शतं गणनाथाय षट्सहस्रं तु वेधसे । षट्सहस्रं च हरये षट्सहस्रं हराय च ॥७९॥
जीवात्मने सहस्रं च सहस्रं गुरवे तथा । चिदात्मने सहस्रं च जपसंख्यां निवेदयेत् ॥८०॥
एतांश्चक्रगतान् ब्रह्ममयूखान् मुनयोऽमरान् । सत्सम्प्रदाय - वेत्तार - श्चिन्वयन्त्यरुणादयः ॥८१॥

अक्षर स्थित भएको छ । त्यसदेखि माथितर प्राप्त भएपछि सेता कान्तिले युक्त भएको आज्ञा स्थान कमलका हजार पातले युक्त भई सत्य आनन्द स्वरूप भएर शिवमय, ज्योतिर्मय (ज्योतिस्वरूप) छ; त्यसको योगीहरू सधैँ ध्यान गर्छन् ॥ ७५ ॥ गणेश. ब्रह्मा. विष्णु. शिव. गुरु र व्यापक परब्रह्म पनि क्रमैले चक्रहरूमा चिन्तन गरोस् ॥ ७६ ॥ रात-दिन श्वासको सूक्ष्म गति २१६०० एक्काइस हजार छ सय पण्डितहरूले कहेका छन् ॥ ७७ ॥ हकार उच्चारण गर्नाले श्वास बाहिर निस्कन्छ फेरि सकारले भित्र प्रवेश गर्दछ । 'हंसः हंसः' यस मन्त्रले जीव तत्त्वपूर्वक जप गर्दछ ॥ ७८ ॥ छ सय जप गणेशलाई निवेदन गरोस् ; छ हजार हरिलाई. छ हजार शिवलाई. जीवात्मालाई एक हजार त्यस्तै गुरुलाई पनि एक हजार. फेरि चैतन्यरूप आत्मालाई एक हजार यस प्रकार सबैलाई जप संख्या निवेदन गरोस् ॥ ७९ ॥ ८० ॥ सत्सम्प्रदाय जान्ने भएका अरुणादि मुनिहरू चक्रमा प्राप्त भएका ब्रह्मका किरणकन चिन्तन गर्दछन् ॥ ८१ ॥ शुक आदि गरिएका मुनिहरू पनि शिष्यहरूलाई उपदेश गर्दछन् यसकारण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुक्रादयोऽपि मुनयः शिष्यानुपदिशन्ति च । अतः प्रवृत्तिं महतां ध्यात्वा ध्यायेत् सदा बुधः ॥८२॥
कृत्वा च मानसीं पूजां सर्वचक्रेष्वनन्यधीः । ततो गुरूपदेशेन गायत्रीमजपां जपेत् ॥८३॥
अधोमुखे ततो रन्ध्रे सहस्रदलपङ्कजे । हंसगं श्रीगुरुं ध्यायेद् वराभयकराम्बुजम् ॥८४॥
क्षालितं चिन्तयेद् देहं तत्पादामृतधारया । पञ्चोपचारैः सम्पूज्य प्रणमेत् तत्स्तवेन च ॥८५॥
ततः कुण्डलिनीं ध्यायेदारोहादवरोधतः । षट्चक्रकृतसञ्चारां सार्धत्रिवलयां स्थिताम् ॥८६॥
ततो ध्यायेत् सुषुम्नाख्यं धामरन्ध्राद्बहिर्गतम् । तथा तेन गता यान्ति तद् विष्णोः परमं पदम् ॥८७॥

बुधजनले ठूलाको प्रवृत्ति विचार गरेर सधैं ध्यान गरोस् ॥ ८२ ॥ एकाग्र चित्त भएको छँदो सबै चक्रमा नानसीपूजा गरोस् । त्यहाँदेखि उप्रान्त गुरुका उपदेशद्वारा अजपा गायत्री जप गरोस् ॥ ८३ ॥ ब्रह्मरन्ध्रमा स्थित अधोमुख भएका हजार पातले युक्त कमलमा वर. अभय छन् कमल-रूपी हातमा जसका यस्ता हंस मन्त्रभा प्राप्त भएका श्रीगुरुको ध्यान गरोस् ॥ ८४ ॥ गुरुका चरणामृतरूपी धाराले धोइएका आफ्ना शरीरको चिन्तन गरोस् र पञ्चोपचारले पूजा गरेर उनका स्तोत्रले प्रणाम गरोस् ॥ ८५ ॥ त्यहाँदेखि उप्रान्त षट्-चक्रमा घुम-फिर गर्ने साढे तीन वलयमा स्थित भएकी कुण्डलिनीको श्वास चढाउनु र उतार्नुका क्रमले ध्यान गरोस् ॥ ८६ ॥ ब्रह्मरन्ध्रदेखि गएका सुषुम्ना नाम भएका धामको ध्यान गरोस् त्यस मार्गले गएका जीव परमपदमा प्राप्त हुन्छन् ॥ ८७ ॥ मैले चिन्तना गरिएका स्वयंज्योति. सनातन. सदा आनन्द स्वरूपको ब्राह्ममुहूर्तमा ध्यान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्थित भएको कुण्डलिनीको श्वास चढाउनु र उतार्नुका क्रमले ध्यान गरोस् ॥ ८६ ॥ ब्रह्मरन्ध्रदेखि गएका सुषुम्ना नाम भएका धामको ध्यान गरोस्
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
त्यस मार्गले गएका जीव परमपदमा प्राप्त हुन्छन् ॥ ८७ ॥ मैले चिन्तना गरिएका स्वयंज्योति, सनातन, सदा आनन्द स्वरूपको ब्राह्ममुहूर्तमा ध्यान

ततो मच्चिन्तितं रूपं स्वयं ज्योतिः सनातनम् । सदानन्दं सदा ध्यायेन्मुहूर्ते ब्राह्मसंज्ञके ॥८८॥
एवं गुरूपदेशेन मनो निश्चलतां नयेत् । न तु स्वेन प्रयत्नेन तद्द् विना पतनं भवेत् ॥८९॥
अन्तर्यागं विधायैवं बहिर्यागं समाचरेत् । स्नानसन्ध्यादिकं कृत्वा कुर्याद्धरिहरार्चनम् ॥९०॥
देहाभिमानिनामन्तर्मुखीवृत्तिर्न जायते । अतस्तेषां तु मद्भक्तिः सुकरा मोक्षदायिनी ॥९१॥
तपोयोगादयो मोक्षमार्गाः सन्ति तथापि च । समोचनस्तु मद्भक्तिमार्गः संसरतामिह ॥९२॥
ब्रह्मादिभिश्च सर्वज्ञैरयमेव विनिश्चितः । त्रिवारं वेदशास्त्राणि विचार्य च पुनः पुनः ॥९३॥

गरोस् ॥८८॥ यस्ता प्रकारले गुरुका उपदेशद्वारा मन निश्चल गराओस् आफै जान्ने नवनोस् । गुरु विना प्रयत्न गरे पतन हुन्छ अर्थात् पुनर्जन्म हुन्छ ॥८९॥ यस्ताप्रकारले अन्तर्याग गरेर वहिर्याग (यज्ञ) गरोस् । स्नान सन्ध्या आदि गरेर हरिको पूजा गरोस् बहिर्याग यही हो ॥९०॥ देहाभिमानी पुरुषलाई अन्तर्मुखी वृत्ति हुँदैन यस कारण तिमीलाई मुक्ति दिने मेरो भक्ति सुकर छ ॥ ९१ ॥ यद्यपि तप, योग आदि मोक्षमार्ग छन् तथापि यस संसारमा आउने-जाने भएका पुरुषलाई मेरा भक्तिको मार्ग नै असल छ ॥ ९२ ॥ ब्रह्मा आदि सर्वज्ञहरूले तीनचोटि वेदशास्त्र पुनः पुनः विचार गरेर यही निश्चय गरे ॥ ९३ ॥ यज्ञादि र श्रेष्ठ धर्महरू चित्त शुद्धिकारक छन् तापनि मेरो भक्ति फलरूपा छन् । ती भक्तिलाई पाएर मनुष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यज्ञादयोऽपि सद्धर्माश्चित्त - शोधनकारकाः । फलरूपा च मद्भक्तिस्तां लब्ध्वा नावसीदति ॥९४॥
एवमाचरणं तार्क्ष्य! करोति सुकृती नरः । संयोगेन च मद्भक्त्या मोक्षं याति सनातनम् ॥९५॥

इति श्रीगरुडपुराणे सारोद्धारे सुकृतिजनजन्माचरणनिरूपणं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

★

कदापि दुःखी हुँदैन ॥ ९४ ॥ हे गरुड ! यस्तो आचरण पुण्यात्मा मनुष्य गर्दछ र मेरा भक्तिका संयोगले सनातन (अविनाशी) मोक्ष प्राप्त गर्दछ ॥ ९५ ॥

इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषायां पञ्चदशोऽध्याय समाप्त ॥१५॥

★

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षोडशोऽध्यायः

गरुड उवाच-श्रुता मया दयासिन्धो ! ह्यज्ञानाज्जीवसंसृतिः । अधुना श्रोतुमिच्छामि मोक्षोपायं सनातनम् ॥१॥
भगवन् देवदेवेश शरणागतवत्सल ! असारे घोर - संसारे सर्वदुःखमलीमसे ॥२॥
नानाविधशरीरस्था ह्यनन्ता जीवराशयः । जायन्ते च म्रियन्ते च तेषामन्तो न विद्यते ॥३॥
सदा दुःखातुरा एव न सुखी विद्यते क्वचित् । केनोपायेन मोक्षेश ! मुच्यन्ते वद मे प्रभो ! ॥४॥
भगवानुवाच-शृणु तार्क्ष्य ! प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि । यस्य श्रवणमात्रेण संसारान्मुच्यते नरः॥५॥

गरुडले सोधे—हे दयासिन्धो ! अज्ञानले जीवको संसृति (संसार) मैले सुनें—अब म सनातन (अविनाशी) मोक्षको उपाय सुन्नाको इच्छा गर्दछु ॥ १ ॥ हे भगवन् ! हे देव-देव ! हे ईश ! हे शरणागतवत्सल ! सबै दुःखले मैलो भएको साररहित घोर संसारमा नाना प्रकारका शरीरमा स्थित अनन्त जीवका समूह उत्पन्न हुन्छन् र मर्छन् पनि; तिनको अन्त्य नै छैन ॥ २ ॥ ३ ॥ हे मोक्षेश ! सधैं मनुष्य दुःखले आतुर भएका छन्—कहीं कोही सुखी छैन, हे प्रभो ! कुन उपायले ती संसारबाट छुट्तछन् त्यो मलाई बताइबक्सियोस् ॥ ४ ॥ भगवान् आज्ञा गरिबक्सिन्छ—हे गरुड ! जो तिमी मसँग सोद्धछौ त्यो बताउँदछु सुन—जसका श्रवणमात्रले मनुष्य संसारदेखि छुट्तछ ॥ ५ ॥ परब्रह्म स्वरूप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्ति देवः परब्रह्मस्वरूपी निष्कलः शिवः। सर्वज्ञः सवकर्ता च सर्वेशो निर्मलोऽद्वयः ॥६॥
स्वयं ज्योतिरनाद्यन्तो निर्विकारः परात्परः। निर्गुणः सच्चिदानन्दस्तदंशाज्जीवसंज्ञकः ॥७॥
अनाद्यविद्योपहताद्‌ यथाग्नौ विस्फुलिङ्गकाः। देहाद्युपाधि-सम्भिन्नास्ते कर्मभिरनादिभिः ॥८॥
सुख-दुःख-प्रदैः पुण्य-पापरूपैर्नियन्त्रिताः। तत्तज्जातियुतं देहमायुर्भोगं च कर्मजम् ॥९॥
प्रतिजन्म प्रपद्यन्ते तेषामपि परं पुनः। ससूक्ष्मलिङ्गशारीरमामोक्षादक्षरं खग! ॥१०॥
स्थावराः कृमयश्चाब्जाः पक्षिणः पशवो नराः। धार्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम् ॥११॥

कलारहित, कल्याणकारक, सर्वज्ञ, सबैका कर्ता, सबैका मालिक, निर्मल र अद्वय देव छन् ॥ ६ ॥ स्वयं ज्योति आदि-अन्तरहित, विकाररहि परभन्दा पनि पर, निगुण सच्चित् आनन्द स्वरूप ब्रह्म छन्; तिनको अंश जीव नामक हो ॥ ७ ॥ अनादि अविद्याले उपहत भएका जीव अनादि कर्महरूद्वारा देहादि उपाधिले भिन्न हुन्छन्। जस्तै—अग्निका स्फुलिङ्ग (झिल्का) अग्निका समूहदेखि पृथक् हुन्छन् त्यस्तै जीव पनि ब्रह्मदेखि भिन्न भएको हो, वस्तुतः जीव पनि ब्रह्मै हो ॥ ८ ॥ सुख र दुःख दिने भएका पाप र पुण्य कर्मले बाँधिएका जीव पुण्य-पापरूप जातिले युक्त भएको देह र कर्मद्वारा उत्पन्न भएका आयु भोग्दछन् ॥ ९ ॥ तो जीवहरूको परम्पराले पुनः पुनः जन्म भइरहन्छ। हे गरुड! मोक्ष नहुञ्जेलसम्म सूक्ष्मसहित लिङ्ग शरीर अविनाशी जान ॥ १० ॥ स्थावरहरू, कीराहरू, पन्छीहरू, बाख्रा आदि गरिएका पशुहरू र मनुष्यहरू धार्मिक देवताहरू र त्यस्तै मोक्ष प्राप्त गर्ने पुरुषहरू पनि यो सबै क्रमैले मुक्ति प्राप्त गर्ने हुन्छन् ॥ ११ ॥ हजारौंचोटि चार प्रकारका शरीर धरण गर्दै छोड्दै; पुण्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र त्यस्तै मोक्ष प्राप्त गर्ने पुरुषहरू पनि यी सबै [illegible] प्रकारका शरीर धारण गर्दै छोड्दै; पुण्य

CC-0. In Public Domain. Digitization by eGangotri. Funding: MHRD

चतुर्विधशरीराणि धृत्वा मुक्त्वा सहस्रशः । सुकृतान्मानवो भूत्वा ज्ञानी चेन्मोक्षमाप्नुयात् ॥१२॥
चतुरशीतिलक्षेषु शरीरेषु शरीरिणाम् । न मानुषं विनाऽन्यत्र तत्त्वज्ञानं तु लभ्यते ॥१३॥
अत्र जन्मसहस्राणां सहस्रैरपि कोटिभिः । कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ॥१४॥
सोपानभूतं मोक्षस्य मानुष्यं प्राप्य दुर्लभम् । यस्तारयति नात्मानं तस्मात् पापतरोऽत्र कः ॥१५॥
नरः प्राप्योत्तमं जन्म लब्ध्वा चेन्द्रियसौष्ठवम् । न वेत्त्यात्महितं यस्तु स भवेद् ब्रह्मघातकः ॥१६॥
विना देहेन कस्यापि पुरुषार्थो न विद्यते । तस्माद् देहं धनं रक्षेत् पुण्यकर्माणि साधयेत् ॥१७॥
रक्षयेत् सर्वदात्मानमात्मा सर्वस्य भाजनम् । रक्षणे यत्नमातिष्ठेज्जीवन् भद्राणि पश्यति ॥१८॥

कर्मले मनुष्य भएर ज्ञानी भयो भने मोक्ष पाउँदछ ॥ १२ ॥ देहधारीहरूका चौरासी लाख ८४००००० शरीरमा मनुष्य शरीरलाई छाडेर अरु शरीरमा तत्त्वज्ञानको लाभ हुँदैन ॥ १३ ॥ यहाँ हजारका पनि हजार, करोड़ौं जन्ममा धेरै पुण्य एकत्रित हुँदा कदाचित् जन्तु मनुष्य शरीर पाउँदछ ॥१४॥ मोक्षको सिंढी स्वरूप दुर्लभ मनुष्य शरीर पाएर जो आफ्नो आत्मालाई तार्दैन त्यसदेखि अतिशय अधिक पापी कुन होला ? ॥१५॥ मनुष्यले सबैभन्दा उत्तम अर्थात् मनुष्य जन्म पाई सुन्दर इन्द्रिय लाभ गरेर जो आत्माको हित गर्दैन त्यो ब्रह्मघातक हुन्छ ॥ १६ ॥ शरीर विना कसैको पनि पुरुषार्थ हुँदैन तस्मात् देह र धनको रक्षा गरेर पुण्यकर्महरू साधन गरोस् ॥ १७ ॥ सधैं आत्माको रक्षा गरोस् । आत्मा सबैको पात्र हो, आत्माको रक्षा गर्नामा यत्न गरोस् । प्राण धारण गर्ने भएको छँदौं अनेक कल्याण देख्तछ ॥ १८ ॥ बार-बार गाउँ, खेत, धन, घर र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनर्ग्रामः पुनः क्षेत्रं पुनर्वित्तं पुनर्गृहम् । पुनः शुभाशुभं कर्म न शरीरं पुनः पुनः ॥१९॥
शरीररक्षणोपायाः क्रियन्ते सर्वदा बुधैः । नेच्छन्ति च पुनस्त्यागमपि कुष्ठादिरोगिणः ॥२०॥
तद्गोपितं स्याद्ध धर्मार्थं धर्मो ज्ञानार्थमेव च । ज्ञानं तु ध्यानयोगार्थमचिरात् प्रविमुच्यते ॥२१॥
आत्मैव यदि नात्मानमहितेभ्यो निवारयेत् । कोऽन्यो हितकरस्तस्मादात्मानं तारयिष्यति ॥२२॥
इहैव नरकव्याधेश्चिकित्सा न करोति यः । गत्वा निरौषधं देशं व्याधिस्थः किं करिष्यति ॥२३॥
व्याघ्रीवास्ते जरा चायुर्याति भिन्नघटाम्बुवत् । निघ्नन्ति रिपुवद्ध रोगास्तस्माच्छ्रेयः समभ्यसेत् ॥२४॥
यावन्नाश्रयते दुःखं यावन्नायान्ति चापदः । यावन्नेन्द्रियवैकल्यं तावच्छ्रेयः समभ्यसेत् ॥२५॥

शुभाशुभ कम हुन्छन् तर बार-बार मनुष्य शरीर हुँदैन ॥ १९ ॥ सधैँ पण्डितहरू द्वारा शरीर रक्षाका उपायहरू गरिन्छन् । कुष्ठादि रोगीहरू पनि शरीर त्याग्नाको इच्छा गर्दैनन् ॥ २० ॥ यस कारण रक्षा गरिएको शरीर धर्मका निमित्त हुन्छ । धर्म ज्ञानका निमित्त; ज्ञान ध्यान र योगका निमित्त हुन्छ र चाँडै मुक्त हुन्छ ॥ २१ ॥ आत्माले नै अहित देखेर पनि आत्मालाई हटाउँदैन भने त्यसको हित गर्ने अरु को हुन्छ अर्थात् कोही पनि हुँदैन । यस कारण कसले अर्काको हित गराउँदछ ? कसैले पनि गराउँदैन ॥ २२ ॥ यसै लोकमा नै जो नरकरूपी रोगको औषधी गर्दैन भने रोगी जन्तु औषधि नभएका देशमा गएर के गर्दछ अर्थात् केही पनि गर्नसक्तैन ॥ २३ ॥ बाघिनी समानको बुढ्याइँ छ, फुटेका गाग्राको पानी झ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDE

यावत् तिष्ठति देहोऽयं तावत् तत्त्वं समभ्यसेत् । सन्दीप्तकोणभवने कूपं खनति दुर्मतिः ॥२६॥
कालो न ज्ञायते नाना कार्यैः संसारसम्भवैः । सुखं दुःखं जनो हन्त न वेत्ति हितमात्मनः ॥२७॥
जातानार्तान् मृतानापद्ग्रस्तान् दृष्ट्वा च दुखितान् । लोको मोहसुरां पीत्वा न बिभेति कदाचन ॥२८॥
सम्पदः स्वप्नसंकाशा यौवनं कुसुमोपमम् । तडिच्चपलमायुष्यं कस्य स्याज्ज्ञानतो धृतिः ॥२९॥
शतं जीवितमत्यल्पं निद्रालस्यैस्तदर्धकम् । बाल्यरोगजरादुःखैरल्पं तदपि निष्फलम् ॥३०॥
प्रारब्धव्ये निरुद्योगो जागर्तव्ये प्रसुप्तकः । विश्वस्तव्यो भयस्थाने हा नरः को न हन्यते ॥३१॥

गर्दैन, जहिलेसम्म आपत्ति आउँदैन, जहिलेसम्म इन्द्रिय बिग्रँदैनन् त्यतिञ्जेलसम्ममा नै आफ्ना कल्याणको अभ्यास गरोस् ॥ २५ ॥ जहिलेसम्म यो देह रहन्छ त्यतिञ्जेलसम्म तत्त्वको अभ्यास गरोस् । घरका कुनामा आगो लागेपछि कुआँ खन्ने मूर्ख हो ॥ २६ ॥ संसारमा उत्पन्न भएका अनेक प्रकारका कामहरू या कार्यहरूले काल जानिंदैन (हन्त इति खेदे) यो बड़ो खेदको कुरा छ कि मनुष्य सुख दुःख र आफ्नो हित पनि जान्दैन ॥ २७ ॥ पैदा भएका, पीड़ित भएका, मरेका, आपत्हरूले घेरिएका र दुःखीहरूलाई पनि देखेर यो लोक (संसार) मोहरूपी मदिरा पिएर कसैदेखि कहीं पनि डराउँदैन ॥ २८ ॥ सम्पत्तिहरू स्वप्नमा देखेका जस्ता छन्, यौवन फूल समान छ र आयु विजुली चम्के जस्तै चञ्चल छ। यो जान्ने भएका कुन पुरुषको धैर्य रहनेछ ॥ २९ ॥ पहिले सय वर्ष बाँच्नु पनि अति थोरै छ। त्यसमा पनि निद्रा आलस्यमा आधा बित्तछ। बाल्यावस्थाका रोगले र बुढ्याइँका दुःखहरूले अल्प भएको आयु त्यो पनि निष्फल छ ॥ ३० ॥ प्रारब्ध कर्म अर्थात् मोक्षको उपाय आरम्भ गर्नु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तोयफेनसमे देहे जीवेनाक्रम्य संस्थिते। अनित्य प्रियसंवासे कथं तिष्ठति निर्भयः ॥३२॥
अहिते हितसंज्ञः स्यादध्रुवे ध्रुवसंज्ञकः। अनर्थे चार्थविज्ञानः स्वमर्थं यो न वेत्ति सः ॥३३॥
पश्यन्नपि प्रस्खलति शृण्वन्नपि न बुद्ध्यति। पठन्नपि न जानाति देवमायाविमोहितः ॥३४॥
तन्निमज्जज्जगदिदं गम्भीरे कालसागरे। मृत्युरोगजराग्राहैन कश्चिदपि बुद्ध्यते ॥३५॥
प्रतिक्षणमयं कालः क्षीयमाणे न लक्ष्यते। आमकुम्भ इवाम्भस्थो विशीर्णो न विभाव्यते ॥३६॥

योग्य हुनेमा चाहिं उद्योग रहित हुने ; ब्रह्मका चिन्तनमा जाग्नु योग्य भएमा चाहिं त्यसमा सुत्ने भएका फेरि भयको स्थान जो संसार छ त्यसमा विश्वास गर्ने भएका यस्ता मनुष्य आश्चर्य छ कि यमराजद्वारा को मारिंदैन अर्थात् सबै मारिन्छन् ॥ ३१ ॥ जीवले आक्रमण गरेर स्थित भएका पानीका फींज जस्तो क्षणमा नाश हुने देह पाई, अनित्य अर्थात् सधैं नरहने प्यारा वस्तुका सहवासमा निर्भर भएर कसरी स्थित रहन्छ ॥ ३२ ॥ अहित (परिणाममा विष तुल्य) मा जो हित सम्झन्छ, अध्रुव (देहादिमा) ध्रुव अर्थात् सत्य मान्दछ, अनर्थ (झूठो आदि जो पन्द्रह अनर्थको मूल धन हो त्यस) मा मेरो धन यै हो भनेर विचार गर्ने यस्तो मनुष्य आफ्नो अर्थ मुक्ति साधन जान्दैन ॥ ३३ ॥ आत्मज्ञान भएपछि मोक्ष हुन्छ भन्ने यो बात जान्दाजान्दै पनि मोक्ष-मार्गदेखि भ्रष्ट हुन्छ। दैवका मायाले मोहित भएको मनुष्य सुन्ने छँदो पनि बुझ्दैन र पढ्ने भएको छँदो पनि जान्दैन ॥ ३४ ॥ यो जगत् मरण, रोग, जरारूपी ग्राहहरूले गहिरा कालरूपी समुद्रमा डुबाएको छँदो कोही पनि जान्दैनन् ॥ ३५ ॥ क्षण-क्षणमा नष्ट हुने काल जानिंदैन जस्तै—काँचा माटाका गाग्रामा हालेको जल कहाँबाट चुह्यो भन्ने थाहा पाउनसकिन्न ॥ ३६ ॥ समर्थवान् पुरुषले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

...जगत् मरण, रोग, जरारूपी ग्राहहरूले गहिरा कालरूपी समुद्रमा डुबाएको जुन्दो कोही पनि जान्दैनन् ॥ ३५ ॥ क्षण-क्षणमा
नष्ट हुने काल जान्दिैन जस्तै—काँचा माटाको गाग्रामा हालेको जल कहाँबाट चुह्यो भन्ने थाहा पाउनसकिन्न ॥ ३६ ॥ समर्थवान् पुरुषले

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युज्यते वेष्टनं वायोराकाशस्य च खण्डनम् । ग्रन्थनं च तरङ्गाणामास्था नायुषि युज्यते ॥३७॥
पृथिवी दह्यते येन मेरुश्चापि विशीर्यते । शुष्यते सागरजलं शरीरस्य च का कथा ॥३८॥
अपत्यं मे कलत्रं मे धनं मे बान्धवाश्च मे । जल्पन्तमिति मर्त्याजं हन्ति कालवृको बलात् ॥३९॥
इदं कृतमिदं कार्यमिदमिन्यत् कृताकृतम् । एवमीहासमायुक्तं कृतान्तः कुरुते वशम् ॥४०॥
श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् । न हि मृत्युः प्रतीक्षेत कृतं वाप्यथवाऽकृतम् ॥४१॥
जरादर्शितपन्थानं प्रचण्ड-व्याधिसैनिकम् । मृत्युशत्रुमधिष्ठोऽसि त्रातारं किं न पश्यति ॥४२॥

बायुलाई बाँध्न सक्तछ, आकाशलाई खण्डन गर्न र तरङ्गहरूको गाँठो पार्न सक्तछ परन्तु जाने भएको आयुमा स्थिरता गर्न सक्तैन ॥ ३७ ॥ जुन कालले गर्दा पृथिवी डढेर जान्छिन्, सुमेरु पर्वत नष्ट-भ्रष्ट हुन्छ र समुद्रको जल सुकेर जान्छ भने शरीरको के कुरा गर्नु ॥ ३८ ॥ मेरा छोरा-नाति छन्, मेरी स्वास्नी छ, मेरो धन छ, मेरा भाई बन्धुहरू छन् यसो भन्ने मनुष्यरूपी बाखो कालरूपी ब्वाँसाद्वारा बलपूर्वक मारिन्छ ॥ ३९ ॥ यो कार्य गरियो, यो गर्न योग्य छ, यो कार्य गरियो अथवा गरिएन—यस्ता प्रकारका चेष्टाले युक्त भएका मानिसलाई यमराज वश गर्दछन् ॥ ४० ॥ भोलि गर्ने काम आजै गरोस् र मध्याह्न बाद गर्ने मध्याह्नभन्दा पहिले नै गरोस् । मृत्यु—यसले कार्य गऱ्यो यसले गरेको छैन भनेर प्रतीक्षा गर्दैन अर्थात् पर्खंदैन ॥ ४१ ॥ बुढ्याइँले देखाइएको छ मार्ग जसका यस्तो र प्रचण्ड रोग छन् सेना जसका यस्तो मृत्युरूपी शत्रुले दबाइएको तँ रक्षा गर्ने परमेश्वरलाई किन देख्तैनस् ॥ ४२ ॥ तृष्णारूपी सियाले छेड़िएको र विषयरूपी पानी सिंचिएको राग-द्वेषरूपी आगामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृष्णासूचीविनिर्भिन्नं सिक्तं विषयसर्पिषा। रागद्वेषानले पक्वं मृत्युरश्नाति मानवम् ॥४३॥
बालांश्च यौवनस्थांश्च वृद्धान् गर्भगतानपि। सर्वानाविशते मृत्युरेवं भूतमिदं जगत् ॥४४॥
स्वदेहमपि जीवोऽयं मुक्त्वा याति यमालयम्। स्त्री-मातृ-पितृ-पुत्रादिसम्बन्धः केन हेतुना ॥४५॥
दुःखमूलं हि संसारः स यस्यास्ति स दुःखितः। तस्य त्यागः कृतो येन स सुखी नापरः क्वचित् ॥४६॥
प्रभवं सर्वदुःखानामालयं सकलापदाम्। आश्रमं सर्वपापानां संसारं वर्जयेत् क्षणात् ॥४७॥
लौहदारुमयैः पाशैः पुमान् बद्धो विमुच्यते। पुत्रदारमयैः पाशैर्मुच्यते न कदाचन ॥४८॥
यावन्तः कुरुते जन्तुः सम्बन्धान्मनसः प्रियान्। तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः ॥४९॥

पकाइएको मानिसलाई मृत्युले खान्छ ॥ ४३ ॥ बालक, जवान, वुढा र गर्भमा स्थित भएका जति हुन् सबैका उपर मृत्यु प्रवेश गर्दछ—यो जगत्को यही स्वरूप छ ॥ ४४ ॥ यो जीव जुन आफ्नो शरीरलाई भोग गरेर यमराजका घरमा जान्छ भने स्वास्नी, बाबु-आमा छोरा-छोरी आदिको सम्बन्ध ता के भन्नू ॥ ४५ ॥ दुःख मूल यो ससार जसको छ सो दुःखी हो। त्यो ससारको जसले त्याग गर्‍यो त्यो सुखी हो अरु सुखी होइनन् ॥ ४६ ॥ यो संसार सब दु-खहरूका उत्पत्तिको स्थान हो र सम्पूर्ण आपद्हरूको घर हौं तथा सबै पापहरूको आश्रय हो, यस कारण क्षणभरमै ससार त्यागोस ॥ ४७ ॥ फलामका पाश (डोरी) ले बाँधिएको मानिस कदाचित् छुट्तछ परन्तु स्वास्नी-छोरा-छोरीरूपी पाशले बाँधिएको कदापि छुट्दैन ॥ ४८ ॥ जन्तु जति मनका प्याराको सम्बन्ध गर्दछ त्यति नै शोकरूपी कीलाहरू जन्तुका हृदयमा गाडिन्छन् ॥ ४९ ॥ वञ्चित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

वञ्चिताशेषवित्तैस्तौर्नित्यं लोको विनाशितः। हा हन्त विषयाहारैर्देहस्थेन्द्रियतस्करैः ॥५०॥
मांसलुब्धो यथा मत्स्यो लोहशङ्कुं न पश्यति। सुखलुब्धस्तथा देही यमबाधा न पश्यति ॥५१॥
हिताहितं न जानन्तो नित्यमुन्मार्गगामिनः। कुक्षिपूरणनिष्ठा ये ते नरा नारकाः खग ! ॥५२॥
निद्रादिमैथुनाहाराः सर्वेषां प्राणिना समाः। ज्ञानवान् मानवः प्रोक्तो ज्ञानहीनः पशुः स्मृतः॥५३॥
प्रभाते मलमूत्राभ्यां क्षुत्-तृड्भ्य मध्यगे रवौ। रात्रौ मदननिद्राभ्यां बाध्यन्ते मूढमानवाः ॥५४॥
स्वदेह-धन-दारादि-निरताः सर्वजन्तवः। जायन्ते च म्रियन्ते च हा हन्ताज्ञानमोहिताः॥५५॥
तस्मात् सङ्गः सदा त्याज्यः सर्वस्त्यक्तु न शक्यते। महद्भिः सह कर्तव्यः सन्तः सङ्गस्य भेषजम् ॥५६॥

(छल स्वरूप) छन् सम्पूर्ण सम्पत्ति जसका यस्ता फेरि विषयरूप आहार भएका, देहमा बसेका इन्द्रियरूपी तस्करहरूले यो लोक सधैं नष्ट भइरहेको छ। यही आश्चर्य युक्त दुःखको कुरा छ ॥ ५० ॥ मासुमा लोभिएको माछो जस्तै फलामको बल्छी देख्दैन, त्यस्तै सुखमा लोभिएको देही यम बाधाकन देख्दैन ॥ ५१ ॥ हे गरुड ! हित अहित नजान्ने भएका सधैं कुमार्गगामी भएका फेरि पेट भर्नामा लागेका जो मनुष्य हुन् ती नरक जाने हुन् ॥ ५२ ॥ निद्रादि मैथुन र आहार सबै प्राणीमा बराबर छन्, तिनमा ज्ञानवान् चाहिं मनुष्य कहिन्छ। ज्ञानहीन भएको पशु समान हो ॥ ५३ ॥ बिहान मल-मूत्रहरूले, मध्याह्नमा भोक-प्यासले र रात्रिमा कामदेव र निद्राले मूढ मानिस बाँधिन्छन् ॥ ५४ ॥ आफ्नो शरीर धन, स्त्री आदिमा लागेका सब जन्तुहरू अज्ञानले मोहित भएका छँदा पैदा हुन्छन् र मर्दछन् पनि ॥ ५५ ॥ यस कारण सङ्ग सदा त्याग्नू योग्य छ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्सङ्गश्च विवेकश्च निर्मलं नयनद्वयम् । यस्य नास्ति नरः सोऽन्धः कथं न स्यादमार्गगः॥५७॥
स्व-स्व-वर्णाश्रमाचार-निरताः सर्वमानवाः । न जानन्ति परं धर्मं वृथा नश्यन्ति दाम्भिकाः ॥५८॥
क्रियायासकराः केचिद्‌ व्रत-चर्यादिसंयुताः । अज्ञानसंवृतात्मानः सञ्चरन्ति प्रतारकाः ॥५९॥
नाममात्रेण सन्तुष्टाः कर्मकाण्डरता नराः । मन्त्रोच्चारणहोमाद्यैर्भ्रामिताः क्रतुविस्तरैः ॥६०॥
एकभुक्तोपवासाद्यैर्नियमैः कायशोषणैः । मूढाः परोक्षमिच्छन्ति मम मायाविमोहिताः ॥६१॥
देहदण्डनमात्रेण का मुक्तिरविवेकिनाम् । वल्मीकताडनादेव मृतः कुत्र महोरगः ॥६२॥

सबै त्याग्न नसके पनि ठूलाको सङ्ग गर्नु योग्य छ । सज्जन सङ्ग औषधि हुन् ॥ ५६ ॥ सत्सङ्ग र विवेक यी दुई निमल नेत्र हुन् ; जसका यी दुई नेत्र छैनन् त्यो मनुष्य अन्धो हो । अन्धो भएपछि कुमार्गगामी किन हुँदैन ? अवश्य हुन्छ ॥ ५७ ॥ सबै मानिस आफ्ना-आफ्ना वर्ण आश्रम तथा आचारमा लागेका छँदा परमार्थ साधन गर्ने धर्म जान्दैनन् र मोक्ष नपाउनाले दाम्भिकहरू वृथा नष्ट हुन्छन् ॥ ५८ ॥ कर्ममा परिश्रम गर्ने कोही छन्, कोही व्रत, पूजा आदिले युक्त भएका छन्, कोही अज्ञानले संवृत (ढाकिएका) आत्मा हुने ठगिएका छँदा घुमोरहेका छन् ॥ ५९ ॥ नाममात्रले सन्तुष्ट भएका कोही कर्मकाण्डमा लागेका छन् र कोही मन्त्रोच्चारण होम आदि यज्ञ-विस्तारले घुमाइएका छन् ॥ ६० ॥ एकचोटि भोजन गरेर उपवास आदिले शरीर सुकाउने नियम द्वारा मेरा मायाले मोह भएका मनुष्य परोक्ष (ब्रह्मज्ञान) को इच्छा गर्दछन् ॥ ६१ ॥ शरीर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

जटाभाराजिनैर्युक्ता दाम्भिका भेषधारिणः । भ्रमन्ति ज्ञानिवल्लोके भ्रामयन्ति जनानपि ॥६३॥
संसारजसुखासक्तं ब्रह्मज्ञोऽस्मीति वादिनम् । कर्मब्रह्मोभयभ्रष्टं तं त्यजेदन्त्यजं यथा ॥६४॥
गृहारण्यसमालोके गतव्रीडा दिगम्बराः । चरन्ति गर्दभाद्याश्च विरक्तास्ते भवन्ति किम् ॥६५॥
मृद्भस्मोद्धूलनादेव मुक्ताः स्युर्यदि मानवाः । मृद्भस्मवासी नित्यं श्वा स किं मुक्तो भविष्यति॥६६॥
तृणपर्णोदकाहाराः सततं वनवासिनः । जम्बूकाखुमृगाद्याश्च तापसास्ते भवन्ति किम्॥६७॥
आजन्ममरणान्तं च गङ्गादितटनिष्ठिताः । मण्डूकमत्स्यप्रमुखा योगिनस्ते भवन्ति किम् ॥६८॥

मर्दन । मतलब यो हो कि शरीरलाई दण्ड दिनाले मात्र मोक्ष हुँदैन ॥ ६२ ॥ जटाको भार एवं मृगचर्मले युक्त भएका योगीको भेष धारण गर्ने भएका दाम्भिकहरू लोकमा ज्ञानीका झैं भ्रमण गर्दछन् र जनलाई भ्रमित गराउँदछन् ॥ ६३ ॥ संसारमा हुने सुखमा आसक्त भएको म ब्रह्मज्ञ हुँ भन्ने कर्म तथा ब्रह्म दुवैदेखि भ्रष्ट भएकालाई, चाण्डाललाई त्यागे झैं त्यागोस् ॥६४॥ घरमा एकनास भएर रहने, जङ्गलमा जस्तै अर्थात् लोकमा निर्लज्ज भएर दिगम्बर भई गदहा आदिका झैं घुम्ने भएका पनि विरक्त हुन्छन् र अर्थात् हुँदैनन् ॥६५॥ माटो, खरानी, धूलो शरीरमा घस्नाले नै मानिस मुक्त हुन्छन् भने माटो खरानीमा सधैं बस्ने कुकुर मुक्त हुन्छ के ? ॥ ६६ ॥ घाँस-पात र पानीको मात्र सधैं आहार गरेर वनमा रहनाले मात्र तपस्वी हुन्छन् भने श्याल, मूसा, मृग आदि पनि तपस्वी भए के ? ॥ ६७ ॥ जन्मदेखि लिएर मरण पर्यन्त गङ्गा आदि नदीका तटमा बसेर मात्र योगी हुन्छन् भने भ्यागुता, माछा आदि योगी हुन् के ? ॥ ६८ ॥ शोलाको आहार गर्नाले मात्र र पृथ्वीको जल नपिउनाले मात्र मानिस व्रती हुन्छन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पारावताः शिलाहाराः कदाचिदपि चातकाः । न पिबन्ति महीतोयं व्रतिनस्ते भवन्ति किम् ॥६९॥
तस्मादित्यादिकं कर्म लोकरञ्जनकारकम् । मोक्षस्य कारणं साक्षात् तत्त्वज्ञानं खगेश्वर !॥७०॥
षड्दर्शनमहाकूपे पतिताः पशवः खग ! परमार्थं न जानन्ति पशुपाशनियन्त्रिताः ॥७१॥
वेदशास्त्रार्णवे घोरे उह्यमाना इतस्ततः । षडूर्मिनिग्रहग्रस्तास्तिष्ठन्ति हि कुतार्किकाः ॥७२॥
वेदागमपुराणज्ञः परमार्थं न वेत्ति यः । विडम्बकस्य तस्यैव तत्सर्वं काकभाषितम् ॥७३॥
इदं ज्ञातमिदं ज्ञेयमिति चिन्तासमाकुलाः । पठन्त्यहर्निशं शास्त्रं परतत्त्वपराङ्मुखाः ॥७४॥
वाक्यछन्दो निबन्धेन काव्यालङ्कारशोभिताः । चिन्तया दुःखिता मूढास्तिष्ठन्ति व्याकुलेन्द्रियाः ॥७५॥

भने परेवा चातक पक्षी व्रती होइनन् के ? ॥ ६९ ॥ हे गरुड ! तस्मात् यी सब कर्म लोकरञ्जक हुन् ; मोक्षको साक्षात् कारण ता तत्त्वज्ञान हो ॥ ७० ॥ हे गरुड ! षट्दर्शनरूप महाकूपमा परेका पशुहरू पशुपाशले बाँधिएका हुँदा परमार्थ जान्दैनन् ॥ ७१ ॥ वेद शास्त्रार्थरूप घोर समुद्रमा परेर यता-उता घुम्ने भएका शोकादि छ प्रकारका तरङ्ग रोक्नलाई व्याकुल भई कुतार्किक भएर रहन्छन् अर्थात् परमार्थ तत्त्व जान्दैनन् ॥ ७२ ॥ वेद, आगम र पुराण जान्ने भई जो परमार्थ जान्दैन; लोक-विडम्बक (ठग्ने) त्यसले बोलेको सबै कागले बोले समान व्यर्थ हो ॥ ७३ ॥ यो ज्ञान हो, यो जान्ने योग्य विषय हो—यस चिन्तामा व्याकुल भएका, परमतत्त्वदेखि मुख फर्काएका रात-दिन शास्त्र पढ्दछन् ॥ ७४ ॥ वाक्य छन्द र निबन्धद्वारा काव्य अलङ्कारले शोभित भएका, चिन्ताले दुःखित भएका मूर्ख भई व्याकुल इन्द्रिय भएर स्थित रहन्छन् ॥ ७५ ॥ परब्रह्म प्राप्त गर्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

अन्यथा परमं तत्त्वं जनाः क्लिश्यन्ति चान्यथा । अन्यथा शास्त्रसद्भावो व्याख्यां कुर्वन्ति चान्यथा॥७६॥
कथयन्त्युन्मनीभावं स्वयं नानुभवन्ति च । अहङ्काररताः केचिद् उपदेशादिवर्जिताः ॥७७॥
पठन्ति वेदशास्त्राणि बोधयन्ति परस्परम् । न जानन्ति परं तत्त्वं दर्वी पाकरसं यथा ॥७८॥
शिरो वहति पुष्पाणि गन्धं जानाति नासिका। पठन्ति वेदशास्त्राणि दुर्लभो भावबोधकः ॥७९॥
तत्त्वमात्मस्थमज्ञात्वा मूढः शास्त्रेषु मुह्यति । गोपः कुक्षिगते छागे कूपे पश्यति दुर्मतिः ॥८०॥
संसार-मोह-नाशाय शब्दबोधो न हि क्षमः । न निवर्तेत तिमिरं कदाचिद् दीपवार्तया ॥८१॥

मार्ग अर्को छ तर जनहरू अर्कै मार्गमा लागेर ब्रह्म प्राप्त गर्न सकेनौं भनेर पिरिन्छन् । शास्त्रको सद्भाव अर्क छ, व्याख्या अर्कै गर्दछन् ॥ ७६ ॥ कोही अहङ्कारले चूर भएका गुरुका सत्-उपदेश रहित अर्थात् हामी स्वयं गोठ बसी भैंसीको दूध खाएर पण्डित भएका 'अब हामी कोसित पढ्न जान्छौं र हामीलाई पढाउने को छ ?' भन्ने अहङ्कार गर्ने भएका उपशम मुद्राद्वारा परब्रह्मत्त्व बताउँदछन् तर स्वयं अनुभव गर्न जान्दैनन् ॥ ७७ ॥ वेदशास्त्र पढ्दछन् र परस्पर बोध पनि गराउँछन् परन्तु परमतत्त्व जान्दैनन् । जस्तै—डाडू-पन्यूँ दाल-भातको रस जान्दैनन् ॥ ७८ ॥ शिरले फूल धारण गर्दछ तर गन्ध चाहिं नाकले जान्दछ । त्यस्तै सबै वेद-शास्त्र पढ्दछन् तर भाव बोध गराउने दुर्लभ छन् ॥ ७९ ॥ आफ्ना शरीरमा रहेको तत्त्वज्ञान नजानी मूर्ख शास्त्रमा मोह हुन्छ । जस्तै—खराब बुद्धि भएको गोप आफ्ना काखीमा बाखाको पाठो राखेर कूपमा हेर्दछ ॥ ८० ॥ संसारको अज्ञान नाश गर्न शब्द-ज्ञान समर्थ छैन । जस्तै—'बत्ती बाल' भन्ने वार्ताले मात्र कदापि अन्धकार हट्तैन ॥ ८१ ॥ श्रेष्ठ बुद्धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रज्ञाहीनस्य पठनं यथान्धस्य च दर्पणम् । अतः प्रज्ञावतां शास्त्रं तत्त्वज्ञानस्य लक्षणम् ॥८२॥
इदं ज्ञानमिदं ज्ञेयं सर्वं तु श्रोतुमिच्छति । दिव्यवर्षसहस्रायुः शास्त्रान्तं नैव गच्छति ॥८३॥
अनेकानि च शास्त्राणि स्वल्पायुर्विघ्नकोटयः । तस्मात् सारं विजानीयात् क्षीरं हंस इवाम्भसि ॥८४॥
अभ्यस्य वेदशास्त्राणि तत्त्वं ज्ञात्वाऽथ बुद्धिमान् । पलालमिव धान्यार्थी सर्वशास्त्राणि सन्त्यजेत् ॥८५॥
यथाऽमृतेन तृप्तस्य नाहारेण प्रयोजनम् । तत्त्वज्ञस्य तथा तार्क्ष्य ! न शास्त्रेण प्रयोजनम्॥८६॥
न वेदाध्ययनान् मुक्तिर्न शास्त्रपठनादपि । ज्ञनादेव हि कैवल्यं नान्यथा विनतात्मज ! ॥८७॥

रहित भएकाले पढ्नु, जस्तै—अन्धोले ऐना हेर्नु हो । यस कारण तत् बुद्धि भएकाले पढिएको शास्त्र तत्त्वज्ञानको लक्षण हो ॥ ८२ ॥ यो ज्ञान हो र यो जान्ने योग्य विषय हो भनेर सबैको सुन्नाको इच्छा हुन्छ; तर देवताको हजार वर्षको आयुको आयु भए तापनि शास्त्रका अन्त्यमा पुग्न सक्दैन ॥ ८३ ॥ अनेक शास्त्रहरू छन्, आयु थोरै छ र विघ्न करोडौं छन् यस कारण सबै शास्त्रको सार जानोस् । जस्तै—पानीमा मिलाएको दूध मात्र हाँसले खान्छ पानी छोडिदिन्छ ॥ ४४ ॥ बुद्धिमान् पुरुषले वेदशास्त्रको अभ्यास गरी तत्त्व जानेर सबै शास्त्र छाडिदिन्छन् । जस्तै—खेतीवालहरू धान जति निकालेर पराल छाडिदिन्छन् ॥ ८५ ॥ जस्तै अमृतले तृप्त भएका पुरुषलाई आहारको प्रयोजन रहँदैन, त्यस्तै हे गरुड ! तत्त्वज्ञान भएकालाई शास्त्रको केही प्रयोजन रहँदैन ॥ ८६ ॥ वेद पढ्नाले मात्र मुक्ति हुँदैन, हे विनताका छोरा गरुड ! ज्ञान द्वारा नै कैवल्य मुक्ति हुन्छ. विना ज्ञान मुक्ति हुँदैन ॥ ८७ ॥ आश्रम मुक्तिको कारण छैन र दर्शन पनि कारए छैन, त्यस्तै सबै धर्म कारण छैनन्, केवल ज्ञान मात्र कारण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहं ब्रह्म परं धाम ब्रह्माऽहं परमं पदम् । एवं समीक्ष्य चात्मानमात्मन्याधाय निष्कले ॥१०७॥
ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् । यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥१०८॥
न यत्र दाम्भिका यान्ति ज्ञानवैराग्यवर्जिताः । सुधियस्तां गतिं यान्ति तानहं कथयामि ते ॥१०९॥

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥११०॥

ज्ञानह्रदे सत्यजले रागद्वेषमलापहे । यः स्नाति मानसे तीर्थे स वै मोक्षमवाप्नुयात् ॥१११॥
प्रौढं वैराग्यमास्थाय भजते मामनन्यभाक् । पूर्णदृष्टिः प्रसन्नात्मा स वै मोक्षमवाप्नुयात् ॥११२॥

कर्ममा लगाओस् ॥ १०६ ॥ परमधाम ब्रह्म मै हुँ, परमपदरूप ब्रह्म पनि मै हुँ । यस्तो देखेर निरुपाधि आत्मामा मन लगाएर ब्रह्मको धारणा मरोस् ॥ १०७ ॥ ॐ यस एकाक्षर ब्रह्मको उच्चारण गर्न भएको छुँदो जो देह त्याग गरेर जान्छ. त्यो श्रेष्ठ गतिमा प्राप्त हुन्छ ॥ १०८ ॥ ज्ञान वैराग्य रहित दाम्भिकहरू जहाँ जाँदैनन् , त्यस गतिमा ज्ञानीहरू जान्छन् , त्यो गति म तिमीलाई बताउँदछु ॥ १०९ ॥ मान र मोहले रहित भएका सङ्ग र दोष जितेका आत्मविद्यामा सधैं लागेका विशेष गरेर दूर भएको छ अभिलाषा जसका सुख-दुःख, भोक-प्यास इत्यादि नाम छ जसका यस्ता द्वन्द्वहरूले छोड़िएका यस्ता ज्ञानी मनुष्यहरू अविनाशी पदमा प्राप्त हुन्छन् ॥ ११० ॥ ज्ञानरूप तलाउ भएका र राग द्वेषरूप मल नष्ट गर्ने सत्यरूप जल भएको यस्तो मानस-तीर्थमा जो स्नान गर्दछ, त्यो निश्चय मोक्ष पाउँदछ ॥ १११ ॥ प्रौढ वैराग्य लिएर जो अरुको भजन नगर्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्माज्ज्ञानेनात्मतत्त्वं विज्ञेयं श्रीगुरोर्मुखात्। सुखेन मुच्यते जन्तुर्घोरसंसारबन्धनात् ॥१०१॥
तत्त्वज्ञस्यान्तिमं कृत्यं शृणु वक्ष्यामि तेऽधुना। येन मोक्षमवाप्नोति ब्रह्मनिर्वाणसंज्ञकम् ॥१०२॥
अन्तकाले तु पुरुष आगते गतसाध्वसः। छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम् ॥१०३॥
गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः। शुचौ विविक्त आसीनो विधिवत् कल्पितासने ॥१०४॥
अभ्यसेन् मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम्। मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥१०५॥
नियच्छेद् विषयेभ्योऽक्षान् मनसा बुद्धिसारथीः। मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद् धिया ॥१०६॥

भएको--मोक्षरूपी वृक्षका छायाको आश्रय गरोस् ॥ १०० ॥ तस्मात् ज्ञानद्वारा श्रीगुरुका मुखदेखि आत्मतत्त्व जानी सुखपूर्वक घोर संसारको बन्धनबाट छुट्तछ ।।१०१।। तत्त्व जान्ने पुरुषको अब अन्तिम कृत्य तिमीलाई बताउँदछु सुन--जुनद्वारा मोक्ष र निर्वाण संज्ञक ब्रह्म प्राप्त गर्दछ ॥ १०२ ॥ अन्तकालमा पुरुष मृत्युका भयदेखि शून्य भएर असङ्गरूपी शस्त्रले देहको सुखादि इच्छा काटिदेओस्। देहका अनुगामी जो स्त्री-पुत्रादि छन् तिनमा प्रेम रहित होस् ॥ १०३ ॥ घरदेखि संन्यासी भएर निस्किएको पुण्य तीर्थका जलमा स्नान गरेको छँदो धीर पुरुष जो छ सो शुद्ध र एकान्त स्थानमा विधिपूर्वक बनाइएका आसनमा अर्थात् कुश, मृग-चर्म वा वस्त्रहरू ओछ्याइएर बनाइएका आसनमा बसोस् ॥ १०४ ॥ शुद्ध त्रिवृत अर्थात् अकार उकार मकार रूप अक्षर जो परब्रह्म हुन् तिनको मनले अभ्यास गरोस् र श्वास रोकेर ब्रह्मबीज स्मरण गर्ने भएको छँदो मनलाई रोकोस ॥ १०५ ॥ बुद्धि-सारथी भएको मनले इन्द्रियलाई विषयदेखि रोकोस्। कर्महरूले प्रेरणा गरिएको मन बुद्धिद्वारा शुभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावत् कर्मणि दीयन्ते यावत् संसारवासना । यावदिन्द्रियचापल्यं तावत् तत्त्वकथा कुतः ॥९५॥
यावद्देहाभिमानश्च ममता यावदेव हि । यावत् प्रयत्नवेगोऽस्ति यावत् सङ्कल्पकल्पना ॥९६॥
यावन्नो मानसस्थैर्यं न यावच्छास्त्रचिन्तनम् । यावन्न गुरुकारुण्यं तावत् तत्त्वकथा कुतः ॥९७॥
तावत् तपो व्रतं तीर्थं जपहोमार्चनादिकम् । वेदशास्त्रागमकथा यावत् तत्त्वं न विन्दति ॥९८॥
तस्मात् सर्वप्रयत्नेन सर्वावस्थासु सर्वदा । तत्त्वनिष्ठो भवेत् तार्क्ष्य! यदीच्छेन्मोक्षमात्मनः ॥९९॥
धर्मज्ञानप्रसूनस्य स्वर्गमोक्षफलस्य च । तापत्रयादिसन्तप्तश्छायां मोक्षतरोः श्रयेत् ॥१००॥

निमित्त जान्नू । अध्यात्म विद्यादेखि अरु शिल्प-नैपुण्य अर्थात् घर इत्यादि बनाउनमा चतुर हुनु चाहिं विद्या हो ॥ ९४ ॥ जहिलेसम्म कर्मको प्रवृत्ति रहन्छ, जहिलेसम्म संसारको वासना रहन्छ र जहिलेसम्म इन्द्रिय चञ्चल रहन्छन् त्यतिञ्जेल तत्त्वको कथा कहाँ हुन्छ? अर्थात् कहीं हुँदैन ॥ ९५ ॥ जैह्लेसम्म देहमा अभिमान रहन्छ, जैह्लेसम्म ममता रहन्छ, जैह्लेसम्म प्रयत्नको वेग रहन्छ र जैह्लेसम्म सङ्कल्पको कल्पना रहन्छ ॥ ९६ ॥ जैह्लेसम्म मनको स्थिरता हुँदैन, जैह्लेसम्म शास्त्रहरूको चिन्तन गर्दैन र जैह्लेसम्म गुरुको करुणा हुँदैन त्यतिञ्जेलसम्म तत्त्वको कथा कहाँबाट हुन्छ ? हुँदैन ॥ ९७ ॥ त्यतिञ्जेलसम्म तपस्या, व्रत, तीर्थ, जप, होम र देवताको पूजा आदि वेद, शास्त्र, आगमको कथा गरोस्— जैह्लेसम्म तत्त्व लाभ गर्दैन ।' ९८ ॥ यस कारण सबै प्रयत्न द्वारा सबै अवस्थामा सधैं हे गरुड ! तत्त्व-निष्ठ होस्—यदि आफ्नो मोक्षको इच्छा गर्दछ भने ॥ ९९ ॥ आध्यात्मिक, आधिदैविक र आधिभौतिक यी तीन तापले तापिएको मनुष्य धर्म र ज्ञान फूल भएको, स्वर्ग र मोक्ष फल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाश्रमः कारणं मुक्तेर्दर्शनानि न कारणम् । तथैव सर्वकर्माणि ज्ञानमेव हि कारणम् ॥८८॥
मुक्तिदा गुरुवागेका विद्या सर्वा विडम्बिका । काष्ठभारसहस्रेषु ह्येकं सञ्जीवनं परम् ॥८९॥
अद्वैतं हि शिवं प्रोक्तं क्रियायासविवर्जितम् । गुरुवक्त्रेण लभ्येत नाधीतागमकोटिभिः ॥९०॥
आगमोक्तं विवेकोत्थं द्विधा ज्ञानं प्रचक्षते । शब्द-ब्रह्मागममयं परब्रह्म-विवेकजम् ॥९१॥
अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चापरे । समं तत्त्वं न जानन्ति द्वैताद्वैतविवर्जितम् ॥९२॥
द्वे पदे बन्धमोक्षाय ममेति न ममेति च । ममेति बध्यते जन्तुर्न ममेति प्रमुच्यते ॥९३॥
तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तिदा । आयासायापरं कर्म विद्यान्या शिल्पनैपुणम् ॥९४॥

छ ॥ ८८ ॥ एकै गुरु-वचन मुक्ति दिने छ, अरु सबै विद्या विडम्बिका हुन् । हज्जारौं काष्ठभारमा एकै सञ्जीवनी बूटी प्राणदायक हुनाले श्रेष्ठ छ ॥ ८९ ॥ क्रियामा परिश्रम रहित गुरुका मुखदेखि पाएको अद्वैत मार्ग कल्याणकारक कहियो, पढिएका करोडौं शास्त्रले पनि त्यो अद्वैत पाइँदैन ॥ ९० ॥ ज्ञान दुई प्रकारको कहियो–एक आगममा कहिएको र दोस्रो विवेकबाट उत्पन्न भएको । आगममय ज्ञान शब्द ब्रह्म हो र विवेकबाट उत्पन्न भएको परब्रह्म हो ॥ ९१ ॥ कोही अद्वैतको इच्छा गर्दछन्, अरु द्वैतको इच्छा गर्दछन् र द्वैत अद्वैत रहित समतत्त्व चाहिं जान्दैनन् ॥ ९२ ॥ मेरो छ र मेरो छैन भन्नू यी दुई वाक्य बन्ध मोक्षका निमित्त जान्नू । यो मेरो भन्यो भने जन्तु संसारमा बाँधियो । मेरो छैन भनी भित्री मनले भन्यो भने संसारदेखि छुट्तछ ॥ ९३ ॥ त्यो कर्म हो जो बन्धनका निमित्त हुँदैन, त्यही विद्या हो मुक्ति दिनेवाली हो, अन्य कर्म परिश्रमका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

त्यक्त्वा गृहं च यस्तीर्थे निवसेन् मरणोत्सुकः । म्रियते मुक्तिक्षेत्रेषु स वै मोक्षमवाप्नुयात् ॥११३॥
अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारावत ज्ञेयाः सप्तैता मोक्षदायिकाः ॥११४॥
इति ते कथितं तार्क्ष्य ! मोक्षधर्म सनातनम् । ज्ञानवैराग्यसहितं श्रुत्वा मोक्षमवाप्नुयात् ॥११५॥
मोक्षं गच्छन्ति तत्त्वज्ञा धार्मिकाः स्वर्गतिं नराः । पापिनो दुर्गतिं यान्ति संसरन्ति खगादयः ॥११६॥
इत्येवं सर्वशास्त्राणां सारोद्धारो निरूपितः । मया ते षोडशाध्यायैः किं भूयः श्रोतुमिच्छसि॥११७॥
सूत उवाच-एवं श्रुत्वा वचो राजन् गरुडो भगवन्मुखात् । कृताञ्जलिरुवाचेदं तं प्रणम्य मुहुर्मुहुः ॥११८॥

भएको छँदो मलाई भजन गर्दछ त्यो पूर्ण दृष्टि भएको प्रसन्न आत्मा भएको छँदो मोक्ष पाउँदछ ॥ ११२ ॥ जो घर त्यागेर मरणोत्सुक भई तीर्थमा गएर वास गरी मुक्ति-क्षेत्रमा मर्दछ. त्यो मोक्ष पाउँदछ ॥ ११३ ॥ अयोध्या १ मथुरा २ माया ३ काशी ४ काञ्ची ५ अवन्तिका ६ द्वारावती ७ यी सात पुरी मोक्ष दिने वाला छन् ॥ ११४ ॥ हे गरुड ! मैले तिमीलाई सनातन मोक्ष धर्म बताएँ जसले ज्ञान वैराग्य सहित भई सुन्दछ त्यसले मोक्ष पाउँदछ ॥ ११५ ॥ तत्त्व जान्ने भएका पुरुष मोक्ष हुन्छन् र धर्म गर्ने भएका मनुष्य स्वर्ग जान्छन् । पापीहरू दुर्गतिमा प्राप्त हुन्छन् र पक्षी-हरू यहीं जन्मन्छन् यहीं मर्दछन् ॥ ११६ ॥ यस्ता प्रकारले सब शास्त्रहरूको मैले सोह्र अध्याय द्वारा निरूपण गरें । अब के सुन्नाको इच्छा गर्दछौ ॥ ११७ ॥ सूतजी भन्दछन्--हे राजन् ! भगवान्का मुखदेखि निस्केका यस्ता वचन सुनेर हात जोडी बार-बार प्रणाम गर्दै गरुडजी भगवान्सित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गरुड उवाच-भगवन् देवदेवेश ! श्रावयित्वा वचोऽमृतम् । तारितोऽहं त्वया नाथ, भवसागरतः प्रभो! ॥११९॥
स्थितोऽस्मि गतसंदेहः कृतार्थोऽस्मि मन संशयः । इत्युक्त्वा गरुडस्तूष्णीं स्थित्वा ध्यानपरोऽभवत् ॥१२०॥
स्मरणाद्दुर्गतिहर्ता पूजनयज्ञेन सद्गतेर्दाता । यः परया निजभक्त्या ददाति मुक्तिं स मां पातु ॥१२१॥

इति श्रीगरुडपुराणे सारोद्धारे भगवद्गरुडसंवादे मोक्षधर्मनिरूपणं नाम षोढशोऽध्यायः ॥ १६ ॥

★

विन्ति गर्दा भए ॥ ११८ ॥ हे भगवन् ! हे देवदेवेश ! हे प्रभो ! हजूरले मलाई अमृतरूप वचन सुनाएर भवसागरबाट तारिबक्सियो ॥ ११९॥ अब सन्देह रहित म स्थित छु र कृतार्थ भएँ यसमा सन्देह छैन । यसो भनी चुपचाप बसेर ध्यान गर्नामा तत्पर हुँदा भए ॥ १२० ॥ स्मरण गर्नाले दुर्गति हरण गर्ने भएका पूजनरूप यज्ञले सद्गति दिने भएका जो हरि भगवान् आफ्ना परम भक्तिद्वारा मुक्ति दिन्छन् । यस्ता हरि भगवान् मलाई रक्षा गरुन् ॥ १२१ ॥

इति श्रीगरुडपुराणे सारोद्धारे नेपालीभाषयां षोडशोऽध्यायः ॥ १६ ॥

★

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ माहात्म्य

भगवानुवाच-इत्याख्यातं मया तार्क्ष्य! सर्वमेवोर्ध्वदैहिकम्। दशाहाभ्यन्तरे श्रुत्वा सर्वपापैः प्रमुच्यते ॥१॥
इदं चामुष्मिकं कर्म पितृमुक्तिप्रदायकम्। पुत्रवाञ्छितदं चैव परत्रेह सुखप्रदम् ॥२॥
इदं कर्म न कुर्वन्ति ये नास्तिक - नराधमाः। तेषां जलमपेयं स्यात् सुरातुल्यं न संशयः ॥३॥
देवताः पितरश्चैव नैव पश्यन्ति तद्गृहम्। भवन्ति तेषां कोपेन पुत्राः पौत्राश्च दुर्गतः ॥४॥

श्रीगणेशाय नमः ॥ श्रीभगवान् आज्ञा गर्नुहुन्छ—हे गरुड! मनुष्यको मृत्यु भएउपरान्त गर्नुपर्ने सम्पूर्ण और्ध्वदैहिक क्रिया यस्ता प्रकारले गर्नुपर्दछ भनी मैले व्याख्यान गरें। यो गरुड पुराण (बन्धुको मृत्यु भएका) १० दिन भित्र सुन्नाले मनुष्य सम्पूर्ण पापदेखि रहित हुन्छ ॥ १ ॥ यस लोकमा गरिने जो कर्म हो सो पितृहरूलाई मोक्षदायक छ। छोराले इच्छापूर्ण फल प्राप्त गर्दछ औ यस लोक र परलोक दुबै लोकमा सुखदायक छ ॥ २ ॥ जो नास्तिक अधम मनुष्य यो पितृ-कर्म गर्दैनन्, तिनीहरूका हातको जलमात्र पनि पिउन हुँदैन किनकि रक्सी समान हुन्छ ॥ ३ ॥ देवता र पितृहरू पनि त्यसको घर हेर्दैनन् र उनीहरूका क्रोधले गर्दा क्रिया नगर्ने छोरा-नातिहरू पनि दुर्गति (महादुःखी, काना, लूला-लंगड़ा इत्यादि) भएर जन्मन्छन् ॥ ४ ॥ ब्राह्मण, क्षत्रिय, वैश्य, चाण्डाल या जोसुकै जाति होस तापनि प्रेत अर्थात् बाबु-आमा र बन्धुवर्गादिको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैवेतरेऽपि च। ते चाण्डालसमा ज्ञेया सर्वे प्रेतक्रियां विना ॥५॥
प्रेतकल्पमिदं पुण्यं शृणोति श्रावयेच्च यः। उभौ तौ पापनिर्मुक्तौ दुर्गतिं नैव गच्छतः ॥६॥
माता-पित्रोश्च मरणे सौपर्णं शृणुते तु यः। पितरौ मुक्तिमापन्नौ सुतः सन्ततिवान् भवेत् ॥७॥
न श्रुतं गारुडं येन गयाश्राद्धं च नो कृतम्। वृषोत्सर्गः कृतो नैव न च मासिकवार्षिके ॥८॥
स कथं कथ्यते पुत्रः कथं मुच्येद् ऋणत्रयात्। मातरं पितरं चैव कथं तारयितुं क्षमः ॥९॥

ढुङ्गाको, वज्रको, रगतको, शस्त्र (तरवार इत्यादि) को, तातापानीको ॥ १२ ॥ धूलाको र हिलाको वृष्टि भइरहन्छ । कहीं अति गैह्रामा हिंड़ाउँछन्, कहीं पर्वतमा र कहीं गुफामा प्रवेश गराउँछन् ॥ १३ ॥ त्यस जङ्गलका बाटामा कहीं गाढ (अत्यन्त) अन्धकार छ, कहीं दुःखले पनि चढ़न नसकिने ढुङ्गाका पहरा छन्, कहीं पीप र रगतले परिपूर्ण भएका, कहीं विष्ठाले भरिएका तलाउ छन् ॥ १४॥ त्यसै बाटामा डरलाग्दो भयङ्कर वैतरणी नाम गरिएकी नदी छन् । तिनलाई देख्नु त के सुन्दैमा पनि डरलाग्दछ ॥ १५ ॥ तो वैतरणी नदी ४००० चार हजार कोश फैलिएको पीप र रगत पानी स्वरूपले बहने भएकी, हाड़हरूका किनार भएकी, रगत मासूको हिलो भएकी ॥ १६ ॥ थाहा पाई नसकिने गहिरो भएकी पापीहरूले तर्नामा कठिन भएको, केशका झ्याउले दुर्गम र अनेक प्रकारका ग्राह पक्षीहरूले युक्त भएकी छन् ॥ १७ ॥ पापी आएको देखेर हे गरुड! ती नदी ज्वाला धुआँले युक्त भएकी छँदी पाक्न थाल्दछिन् । जस्तै—तताएको कराही भित्रको घिउ पाक्दछ ॥ १८ ॥ सियो जस्तै तीखा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoE

सिंहैर्व्याघ्रैः श्वभिर्घोरैर्भक्ष्यते क्वापि पापकृत्। वृश्चिकैर्दश्यते क्वापि क्वचिद्दह्यति वह्निना ॥६॥
ततः क्वचिन् महाघोरमसिपत्रवनं महत्। योजनानां सहस्रे द्वे विस्तारायामतः स्मृतम् ॥७॥
काकोलूक-वट-गृध्र-सरघा-दंशसंकुलम् । सन्दावाग्नि च तत्पत्रैश्छिन्नभिन्नः प्रजायते ॥८॥
क्वचित् पतत्यन्धकूपे विकटात् पर्वतात्क्वचित्। गच्छते क्षुरधारासु शंकूनामुपरि क्वचित् ॥९॥
स्खलत्यन्धे तमस्युग्रे जले निपतति क्वचित्। क्वचित् पङ्के जलौकाढये क्वचित्सन्तप्तकर्दमे ॥१०॥
सन्तप्तबालुकाकीर्णे ध्मातताम्रमये क्वचित्। क्वचिदङ्गारराशौ च महाधूमकुले क्वचित् ॥११॥
क्वचिदङ्गारवृष्टिश्च शिलावृष्टिः सवज्रका। रक्तवृष्टिः शस्त्रवृष्टिः क्वचिदुष्णाम्बुवर्षणम् ॥१२॥

टोकिंदै ॥ ५ ॥ सिंह-व्याघ्रले दारिंदै कहीं कुकुरले टोकिंदै र अग्निले पनि पोलिंदै जान्छ ॥ ६ ॥ त्यहाँदेखि ८००० कोश लामू अति डरलाग्दो असिपत्र नाम भएको अर्थात् पात पनि तरवार जस्ता भएको वन आउँछ ॥ ७ ॥ त्यस जङ्गलमा काग उल्लू चिल (बाज) गिद्ध माहुरी बारुला सधैं बसिरहेका छन्। 'चट-चट' गर्ने डढेलो लागिरहेको छ। तरवार जस्ता पात लागेर शरीर छिन्न-भिन्न गराउँछ ॥ ८ ॥ यमराजका दूतले कहीं अँधेरा कूवामा, कहीं विकट पर्वतबाट खसाल्छन्। कहीं छुराका धारमा र कहीं काँढामा हिंड़ाउँ छन् ॥ ९ ॥ कहीं अँधेरामीं कहीं पानीमा गिराउँदछन्, कहीं जूकाले युक्त भएका हिलामा पापीलाई गाड़दछन् ॥ १० ॥ यमराजका दूतले पापी पुरुषलाई कही तताएका बालुवामा, कहीं ताता फलाममा, कहीं बल्दा कोइलामा र कहीं धुवें-धुवाँले युक्त भएका ठाममा हिंड़ाउँछन् ॥ ११ ॥ पापी पुरुषका उपरमा अग्निको बर्षा तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयोऽध्यायः

गरुड उवाच–कीदृशो यमलोकस्य पन्था भवति दुःखदः। तत्र यान्ति यथा पापास्तन्मे कथय केशव ॥१॥
भगवानुवाच-यममार्गं महद्दुःखप्रदं ते कथयाम्यहम्। मम भक्तोऽपि तच्छ्रुत्वा त्वं भविष्यसि कम्पितः ॥२॥
वृक्षच्छाया न तत्रास्ति यत्र विश्रमते नरः। यस्मिन् मार्गे न चान्नाद्यं येन प्राणान् समुद्धरेत् ॥३॥
न जलं दृश्यते क्वापि तृषितोऽतीव यः पिबेत्। तपन्ते द्वादशादित्याः प्रलयान्ते यथा खग ! ॥४॥
तस्मिन् गच्छति पापात्मा शीतवातेन पीडितः। कण्टकैर्विध्यते क्वापि क्वचित्सर्पैर्महाविषैः ॥५॥

श्रीगणेशाय नमः ॥ हरिः ॐ तत्सत् ॥ गरुड़जी भन्दछन्—हे भगवन् ! यमलोकको बाटो कस्तो दुःखदायी छ; जहाँ पापीहरू जान्छन् ; यो सबै मलाई आज्ञा हवस् ॥ १ ॥ भगवान् आज्ञा गर्नुहुन्छ—यमलोकको बाटो अति दुःखदायी छ; म तिमीलाई भन्दछु—मेरा भक्त छौ तापनि त्यो कष्ट सुनी काँप्न थाल्नेछौ ॥ २ ॥ जुन मार्गमा वृक्षहरूको छाया र विश्राम गर्ने ठाउँ पनि छैन, अन्नादिहरू पनि पाइँदैन त्यस्ता स्थानमा प्राणको उद्धार (रक्षा) गर्न पनि दुर्लभ छ ॥ ३ ॥ हे गरुड़जी ! प्यासले सताइएको छँदो पानी कहीं देख्न पिउन पनि पाउँदैन । जहाँ सधैँ बाह्र सूर्य लागेर प्रलयकाल झैं पोलिरहेका छन् ॥ ४ ॥ पापी कहीं चीसो-चीसो वायुले पीड़ित भएको छँदो कहीं काँढाले घोचिँदै, कहीं विषालु सर्पले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

सौम्यं सौरिपुरं नगेन्द्रभवनं गन्धर्वशैलागमौ । क्रौञ्चं क्रूरपुरं विचित्रभवनं बह्वापदं दुःखदम् ॥
नानाक्रन्दपुरं सुतप्तभवनं रौद्रं पयोवर्षणम् । शीताढ्यं बहुभीतिधर्मभवनं याम्यं पुरं चाग्रतः ॥५९॥
याम्यपाशैर्धृतः पापी हाहेति प्ररुदन् पथि । स्वगृहं तु परित्यज्य पुरं याम्यमनुव्रजेत् ॥६०॥

इति श्रीसारोद्धारे गरुडपुराणे पापीनामैहिकामुष्मिकनिरूपणं नाम प्रथयोऽध्यायः ॥ १ ॥

*

गुण जान्नू । जस्तै—१ सौम्यपुर, २ सौरिपुर, ३ नगेन्द्रभवन, ४ गन्धर्व, ५ शैलागम, ६ क्रौञ्चपुर, ७ क्रूरपुर, ८ विचित्र-भवन, ९ बह्वापद, १० दु:खदपुर, ११ नानाक्रन्दपुर, १२ सुतप्तभवन, १३ रौद्रनगर, १४ पयोवर्षणपुर, १५ शीताढ्यपुर र १६ बहुभीति नगर । यी सोह्र शहर नाघी गएपछि धर्म-भवन अर्थात् यमपुरी आउँछ ॥ ५९ ॥ यस्ता किसिमका नाना दुःखदायी बाटामा हा धिक्कार हा ! यस्ता प्रकारले विलाप गर्दै अत्यन्त रुने भएको यमराजका दूतहरू द्वारा डोरीले बाँधिएकी पापी 'यहाँको' आफ्नू घर सबै हिसावले त्याग गरी अनि यमराजको पुरीमा जान्छ ॥ ६० ॥

श्रीगरुडपुराणको सारोद्धार गरिएका षोडश अध्याय यध्ये पापीहरूको यमलोक परलोकको दुःख निरूपण गरिएको प्रथम अध्याय समाप्त गरियो ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जानुपादौ तथा द्वाभ्यां दशमेऽह्नि क्षुधा तृषा । पिण्डजं देहमाश्रित्य क्षुधाविष्टस्तृषार्दितः ॥५३॥
एकादशं द्वादशञ्च प्रेतो भुङ्क्ते दिनद्वयम् । त्रयोदशेऽहनि प्रेतो यन्त्रितो यमकिङ्करैः ॥५४॥
तस्मिन् मार्गे व्रजत्येको गृहीत इव मकटः । ॥५५॥
षडशीति सहस्राणि योजननां प्रमाणतः । यममार्गस्य विस्तारो विना वैतरणी खग ! ॥५६॥
अहन्यहनि वै प्रेतो योजनानां शतद्वयम् । चत्वारिंशत् तथा सप्त दिवारात्रेण गच्छति ॥५७॥
अतीत्य क्रमशो मार्गे पुराणीमानि षोडश । प्रयाति धर्मराजस्य भवनं पातकी जनः ॥५८॥

बनिन्छन् ॥ ५२ ॥ घुँड़ा र पाऊ पनि आठौं र नवौं यी दुइ दिनका पिण्डले बन्छन् । यसरी सबै अङ्ग पूर्ण बनिसकेपछि दसौं दिनमा दिएका पिण्डले भोक र प्यास उत्पन्न हुन्छ । यस्ता हिसाबले पिण्डबाट उत्पन्न भएको देह पाई भोकले सताइएको र प्यासले दुःखी भएको प्रेत ॥ ५३ ॥ केवल एघारौं र बाह्रौं यी दुइ दिनमा दिएको पिण्डादि मात्र खान पाउँछ । तेह्रौं दिनका दिन यमराजका सिपाहीहरूले बाँधिएको प्रेत ॥ ५४ ॥ त्यहीं यम-मार्गमा 'कसैले' पक्रिएर हिंड़ाएको एक्लो वानर झैं हिंड़्दछ ॥ ५५ ॥ हे गरुड़जी ! वैतरणी नदी बाहेक ८६ हजार योजन अर्थात् ३४४ हजार कोश यम-मार्गको फैलावट छ भनी प्रमाण द्वारा निश्चय गरिएको छ ॥ ५६ ॥ हररोज प्रेत २०० योजन अर्थात् ८०० कोश त्यस्तै ४७ योजन अर्थात् १८८ कोश जम्मा ५८८ कोश दिन-रात गरेर हिंड़्दछ ॥ ५७ ॥ पातकी जन अर्थात् पापी पुरुष बाटामा क्रमैले (बीचमा परेका) यी १६ शहर नाघेर यमराजको दरबारमा जान्छ ॥ ५८ ॥ अब ती कुन-कुन १६ शहर हुन ; तिनको नाम कहिन्छ । ती शहरहरूका नाम अनुसारको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

भागद्वयं तु देहस्य पुष्टिदं भूतपञ्चके । तृतीयं यमदूतानां चतुर्थं सोपजीवति ॥४८॥
अहोरात्रैश्च नवभिः प्रेतः पिण्डमवाप्नुयात् । जन्तुर्निष्पन्नदेहश्च दशमे बलमाप्नुयात् ॥४९॥
दग्धे देहे पुनर्देहः पिण्डैरुत्पद्यते खग ! । हस्तमात्रः पुमान् येन पथि भुङ्क्ते शुभाशुभम् ॥५०॥
प्रथमेऽहनि यः पिण्डस्तेन मूर्धा प्रजायते । ग्रीवास्कन्धौ द्वितीयेन तृतीयाद्धृदयं भवेत् ॥५१॥
चतुर्थेन भवेत् पृष्ठं पञ्चमान्नाभिरेव च । षष्ठेन च कटी गुह्यं सप्तमात् सक्थिनी* भवेत् ॥५२॥

सो प्रेतले खान पाउँछ ॥ ४८ ॥ नौ रात र नौ दिनसम्म त सो प्रेत पिण्डकन पाउँछ; परन्तु दसौं दिनका श्राद्धले प्राणधारी सबै शरीर बनिसकेको हुँदा बल प्राप्त गर्दछ ॥ ४९ ॥ मरेपछि फेरि कसरी देह प्राप्त हुन्छ भन्छौ भने हे पक्षिराज ! देह दाह गरिसके तापनि फेरि तीनै दिएका पिण्डहरूले देहोत्पत्ति हुन्छ र एक हातमात्रको पुरुष हुन्छ जुन देह पाई बाटामा आफूले गरेक शुभ अशुभ कर्मको भोग गर्दछ ॥ ५० ॥ पिण्डहरूले कसरी शरीर बन्दछ भने—पहिलो दिन दिएको पिण्डले शिर बन्दछ । दोस्रो दिन दिएको जो पिण्ड हो त्यसले गला र काँध बन्दछन् । तेस्रो दिनको पिण्डले हृदय बन्दछ ॥ ५१ ॥ अनि चौथो दिनमा दिएका पिण्डले पिठ्यूँ बन्न जान्छ । पञ्चम अर्थात् पाँचौं दिनमा दिएका पिण्डदेखि नाभि उत्पन्न हुन्छ । छैठा दिनको पिण्डले—कमर, गुह्य, (लिङ्ग, भग, गुदा र सब ठाउँको मासु आदि) बन्छन् । सातौं दिनका पिण्डदेखि जाँघ (अपूर्ण हाड़हरू)

* मूलमा 'सप्तमादस्थिसक्थिनी' यस्तो पाठ उचित छ; किनकि 'भवेताम्' यस्तो क्रियापद हुनुपर्ने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भुङ्क्ते पिण्डं सुतैर्दत्तं दानं चातुरकालिकम् । तथापि नास्तिकस्ताक्ष्र्य तृप्तिं याति न पातकी ॥४३॥
पापिनां नोपतिष्ठन्ति दानं श्राद्धं जलाञ्जलिः । अतः क्षुद्‌व्याकुला यान्ति पिण्डदानभुजोऽपि ते॥४४॥
भवन्ति प्रेतरूपान्ते पिण्डदानविवर्जिताः । आकल्पं निर्जनारण्ये भ्रमन्ति बहुदुःखिताः ॥४५॥
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि । अभुक्त्वा यातनां जन्तुर्मानुष्यं लभते न हि ॥४६॥
अतो दद्यात् सुतः पिण्डान् दिनेषु दशसु द्विज । प्रत्यहं ते विभज्यन्ते चतुर्भागैः खगोत्तम ! ॥४७॥

बाँधिएको भोक-प्यासले पीडित भएर रुन लाग्दछ ॥ ४२ ॥ यद्यपि छोराहरूले दिएको पिण्ड औ आतुर कालमा दिएको दान खान पाउँदछ, तथापि नास्तिक हुनाले सो पातकी (पापी पुरुष) तृप्त हुँदैन ॥ ४३ ॥ पापीहरूका निमित्त दिइएको दान, श्राद्ध, जलाञ्जलि, तर्पण यी कुनै कुरा तृप्तिकारक हुँदैनन् । यसै कारणले पिण्ड खान पाए तापनि तृप्ति नभई ती पापीहरू भोक-प्यासले व्याकुल भएर (यम-मार्गमा) जान्छन् ॥ ४४ ॥ जसको पिण्डादि दान हुँदैन, तिनीहरू प्रेत हुन्छन् औ कल्पपर्यन्त कोही नभएका जङ्गलमा अत्यन्त दुःखी भएर घुम्दछन् ॥ ४५ ॥ किनकि आफ्नू सुकृत दुष्कृत जस्तो कर्म भए पनि भोग नसकेसम्म सयकड़ौं कोटिकल्पसम्म पनि कर्म क्षीण हुँदैन । तसर्थ पापीहरूले यमराजको यातना भोग नगरी सकेसम्म केही गरे पनि यो मनुष्य चोला पाइँदैन ॥ ४६ ॥ यस कारण अर्थात् प्रेत भएर बस्न नपरोस् भन्नाका निमित्त हे गरुडजी ! दस दिनसम्म छोराले पिण्डदान गरोस् । ती पिण्डहरू प्रतिदिन चार भाग लगाइन्छन् । हे खगराज ॥ ४७ ॥ ती पिण्डका चार भागमध्ये दुइ भाग पञ्चमहाभूत (पृथ्व्यप्तेजोवाय्वाकाश) लाई जान्छ, जुन पञ्चमहाभूतद्वारा देहको पुष्टि हुन्छ । तेस्रो भाग यमदूतहरूका निमित्त र चौथो भागमात्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षुत्तृट्परीतोऽर्कदवानलानिलैः सन्तप्यमानः पथि तप्तबालुके ।
कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोऽपि निराश्रयोदके ॥३८॥
तत्र तत्र पतच्छ्रान्तो मूर्छितः पुनरुत्थितः । यथा पापीयसा नीतस्तमसा यमसादनम् ॥३९॥
त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीयते तत्र मानवः । प्रदर्शयन्ति दूतास्ता घोरा नरकयातनाः ॥४०॥
मुहूर्तमात्रात् त्वरितं यमं वीक्ष्य भयं पुमान् । यमाज्ञया समं दूतैः पुनरायाति खेचरः ॥४१॥
आगम्य वासनाबद्धो देहमिच्छन् यमानुगैः । धृतः पाशेन रुदति क्षुत्तृड्भ्यां परिपीडितः ॥४२॥

पाप सम्झी पश्चात्ताप गर्दो छँदो ॥ ३७ ॥ भोक-प्यासले व्याकुल, चारैतिर कहीं घाम, कहीं डढेलो, कहीं आँधी बेहरीहरूले पीडित बाटामा तातेका बालुवामा (हिंड्दा) अत्यन्त ताप गर्ने भएको पिठ्यूँमा यमदूतहरूले कोर्राले हिर्काइएको कहीं बस्ने ठाउँ नभएको पानी नभएका ठाउँमा हिंड्नसक्तैन तापनि दुःखले हिंड्दछ (वंशस्थ, इन्द्रछन्द) ॥ ३८ ॥ यसो हुँदा कहीं लड्दै-पड्दै थाकेको मूर्छा खाँदै फेरि उठेका जस्तै अत्यन्त पाप गरिएका अज्ञानताले यमपुरीमा लगिन्छ, त्यस्तै यमदूतहरूले पनि त्यसकन यमपुरीमा लैजान्छन् ॥ ३९ ॥ (सो पापी पुरुष मरेपछि) तीन या दुइ मुहूर्त अर्थात् ४।६ घड़ीले (त्यति समयमा) यमपुरी तर्फ यमदूतहरूले लगिन्छ, अनि दूतहरू त्यसलाई अति घोर नरकका यातनहरू देखाउँदछन् ॥ ४० ॥ अनि मुहूर्त मात्रले भयङ्कर यमराज देखेर (डराउँदै) सो पुरुष यमदूतहरूसँग आकाश-मार्गी भई फेरि सोही मृतस्थानमा आउँदछ ॥ ४१ ॥ त्यहाँ आएर पनि विषयादि वासनाले बाँधिएको आफ्नू शरीरको इच्छा गर्दछ तापनि पछाड़ि लागेका यमदूतहरूले डोरीले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अङ्गुष्ठमात्रः पुरुषो हाहा कुर्वन् कलेवरात् । तदैव गृह्यते दूतैर्याम्यैः पश्यन् स्वकं गृहम् ॥३२॥
यातनादेह आवृत्य पाशैर्बध्वा गले बलात् । नयतो दीर्घमध्वानं दण्ड्यं राजभटा यथा ॥३३॥
तस्यैवं नीयमानस्य दूताः सन्तर्जयन्ति च । प्रवदन्ति भयं तीव्रं नरकाणां पुनः पुनः ॥३४॥
शीघ्रं प्रचल दुष्टात्मन् यास्यसि त्वं यमालयम् । कुम्भीपाकादिनरकांस्त्वां नयामोऽद्य मा चिरम्॥३५॥
एवं वाचस्तदा शृण्वन् बन्धूनां रुदितं तथा । उच्चैर्हाहेति विलपंस्ताड्यते यमकिंकरैः ॥३६॥
तयोर्निर्भिन्न - हृदयस्तर्जनैर्जात - वेपथुः । पथि श्वभिर्भक्ष्यमाण आर्तोऽघं स्वमनुस्मरन्॥३७॥

हुन्छन् । सो मृतक तिलकन देखी डरले मुटु कँपाएर गुह्य-मूत छोड्न लाग्दछ ॥ ३१ ॥ अनि हा-हा गर्दै शरीरदेखि छुटेर अङ्गुष्ठ जत्रो भई पुरुष आफ्नू घर हेर्न लाग्ने भएको छँदो यमदूतहरूले पक्रिइन्छ ॥ ३२ ॥ अनि नरक भोग गर्न शरीर पाउँछ । सो शरीर ढाकी जोरसँग पाशोले गला बाँधी लामू बाटो (अर्थात् यममार्ग मा लैजान्छन् । जस्तै राजाका सिपाहीहरूले दण्ड दिनका निम्ति (चोर आदिकन) लैजान्छन् ॥ ३३ ॥ आफूलाई लैजाने भएका दूतहरू डर देखाई नरकको दुःसह भयकन बताउन लाग्दछन् ॥ ३४ ॥ के भने— हे दुष्टात्मन् ! पापी ! चाँड़ों हिंड़, तैंले यमराजका दरबारमा जानुपर्नेछ । (अनि वहाँको हुकुम मुताबिक कुम्भीपाक, रौरव इत्यादि नरकमा लैजान्छौं, ढिलो नगर् ॥ ३५ ॥ ती यम-दूतहरूले त्यसो भनेको र यता आफ्ना बन्धुहरूले रोएको सुनी ठूलो स्वरले हा हा गरी विलाप गर्नलाग्छ, अनि यमदूतहरूले ताड़ना गरिन्छ ॥ ३६ ॥ ती दूतहरूले भग्न हृदय गराइएको डराउनाले काँप्नलागेको, बाटामा कुकुरहरूले (लुछिएको) अत्यन्त दुःखी भई आफूले गरेको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मिन्नन्तक्षणे तार्क्ष्य ! दैवी दृष्टिः प्रजायते । एकीभूतं जगत्सर्वं न किञ्चिद्वक्तुमीहते ॥२६॥
विकलेन्द्रियसङ्घाते चैतन्ये जडतां गते । प्रचलन्ति ततः प्राणा याम्यैर्निकटवर्तिभिः ॥२७॥
स्वस्थानाच्चलिते श्वासे कल्पाख्यो ह्यातुरक्षणः । शतवृश्चिकदंशस्य या पीडा सानुभूतये ॥२८॥
फेनमुद्गिरते सोऽयं मुखं लालाकुलं भवेत् । अधोद्वारेण गच्छन्ति पापीनां प्राणवायवः ॥२९॥
यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ । पाशदण्डधरौ नग्नौ दन्तैः कटकटायतौ ॥३०॥
ऊर्ध्वकेशौ काककृष्णौ वक्रतुण्डौ नखायुधौ । स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुञ्चति ॥३१॥

वखतमा दिव्यदृष्टि प्राप्त हुन्छ र हे गरुडजी ! सम्पूर्ण जगत्कन एकाकार देख्दछ । (अर्थात् पूर्वजन्मादिमा गरेका पाप-पुण्यको भोग र गर्दै गरेको गर्नुपर्ने इत्यादि सम्पूर्णको समस्त हाल थाहा पाउँछ) तापनि बोल्नमा समर्थ हुँदैन ।। २६ ॥ सम्पूर्ण इन्द्रियहरू टुट्न लागी चैतन्य (होश) हराएर जडता (अज्ञान) प्राप्त भई यमदूतहरू नजीकमा आएपछि प्राणवायुहरू निस्कन लाग्दछन् ॥ २७ ॥ आफ्नो ठाउँ छोड़ी श्वास छुट्न लागेमा अत्यन्त पीड़ित भएका (मुमुर्षू) एक क्षण पनि कल्पसमान ठान्ने भएको छदो शयकडौं विच्छीले एकैचोटि डस्दा हुने पीडा अनुभव गर्दछ ॥ २८ ॥ त्यसो हुँदा सो मृतक फिज उकेल्न लाग्दछ, त्यसको मुखमा राल (सिंघान) भरिएको हुन्छ । पापीहरूका प्राणवायुहरू अधोद्वार (लिङ्ग, भग, गुदा इत्यादि) द्वारा छुट्दछन् ॥ २९ ॥ त्यस बेला अत्यन्त डरलाग्दा चञ्चल नेत्र भएका पाशो र लट्ठी लिएका नाङ्गा दाँत कटकट गर्ने ॥ ३० ॥ ठाड़ा-ठाड़ा केश र कागका जस्ता काला बाङ्गो मुख भएका नङ्ग्राले नै हथियारको काम लिने यमराजका दुइटा दूतहरू आएका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आधिव्याधिसमायुक्तं जीविताशासमुत्सुकम् । कालो बलीयानहिवदज्ञातः प्रतिपद्यते ॥२०॥
तत्राप्यजातनिर्वेदो म्रियमाणः स्वयम्भृतैः । जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे ॥२१॥
आस्तेऽवमत्योपन्यस्तं गृहपाल इवाहरन् । आमया व्यप्रदीप्ताग्निरल्पाहारोऽल्पचेष्टितः ॥२२॥
वायुनोत्क्रमतोत्तारः कफ-संरुद्ध-नाडिकः । कास-श्वासकृतायासः कण्ठे घुरघुरायते ॥२३॥
शयानः परिशोचद्भिः परिवीतः स्वबन्धुभिः । वाच्यमानोऽपि न ब्रूते कालपाशवशं गतः ॥२४॥
एवं कुटुम्बभरणे व्यापृतात्माऽजितेन्द्रियः । म्रियते रुदतां स्वानामुरुवेदनयास्तधीः ॥२५॥

र बाहिरी ज्वरादिले युक्त भएको छँदो धेरै कालसम्म बाँच्नको आशा गर्दछ । तर अज्ञानले युक्त भई बलवान् सर्पले ग्रस्त भए झैं कालका वशमा पर्दछ ॥ २० ॥ त्यति हुँदा पनि आफैंले पालिएका पुत्रादिले पालन-पोषण गर्न लागिएको छँदो बुढ्याइँले कुरूप भइसकेको घरमा (अहिले हो कि मरे भने झैं) मर्न तयार भइसकेको छ तापनि आफ्नो मरण अवस्थाकन जान्दैन ॥ २१ ॥ अनादरले दिएको कुकुरले झैं खाने भएको छँदो रोगले मन्दाग्नि भएको अतएव आहार घटेको छँदो हिंड-डुल गर्ने शक्ति रहित हुनजान्छ ॥ २२ ॥ उत्क्रम वायुले शब्द मन्द भएको, कफले नाडीहरू रोकिएको खोकीद्वारा श्वास खिचिनका निमित्त उद्योग गरिएको (या परिश्रम युक्त) घाँटीमा (घुर घुर गरी) घुरघुराउन लाग्दछ ॥ २३ ॥ अत्यन्त शोक गर्ने बन्धुवर्गले घेरिएर सुतेको छँदो बोलाएक पनि कालपाशका वशमा भएर बोल्नसक्तैन ॥२४॥ यस्ता रीतले जहान पालनका निम्ति उद्योग गर्ने इन्द्रियका वशमा परेको मर्ने वखतका अत्यन्त कष्टले बुद्धि हराएको छँदो आफ्ना बन्धुवर्गले रुँदारुँदै मर्दछ ॥ २५ ॥ सो मरेका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MDI

ये हि पापरतास्ताक्ष्र्य ! दया-धर्मविवर्जिताः । दुष्टसङ्गाश्च सच्छास्त्रसत्सङ्गतिपराङ्मुखाः ॥१४॥
आत्मसम्भाविताः स्तब्धा धन-मान-मदान्विता । आसुरं भावमापन्ना दैवीसम्पद्विवर्जिताः ॥१५॥
अनेक-चित्त-विभ्रान्ता मोह-जाल-समावृताः । प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६॥
ये नरा दानशीलाश्च ते यान्ति परमां गतिम् । पापशीला नरा यान्ति दुःखेन यमयातनाम् ॥१७॥
पापीनामैहिकं दुःखं यथा भवति तच्छृणु । ततस्ते मरणं प्राप्य यथा गच्छन्ति यातनाम् ॥१८॥
सुकृतं दुष्कृतं वापि भुक्त्वा पूर्वं यथार्जितम् । कर्मयोगात् सदा तस्य कश्चिद् व्याधिः प्रजायते ॥१९॥

गर्दछु, सुन ॥ १३ ॥ हे तार्क्ष्य गरुडजी ! जो नित्य पाप कर्ममा लागेका, दया-धर्म कत्ति नभएका, दुष्टको सङ्गत गर्ने, सत्सङ्गदेखि मन्टो फर्काउने ॥ १४ ॥ आफूभन्दा ठूलो कसैलाई नसम्झने, वज्रस्वाँठ, धन र अहङ्कारका ढुकुटी भएका, राक्षसी मतमा लागेका दैवी सम्पत् (अर्थात् "अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितः ।" इत्यादि गीता १६।१-२-३) ले रहित भएका ॥ १५ ॥ फेरि अनेक 'कुतर्कादि कल्पनाले' चित्त भ्रमित भएका मोहजालमा फँसेका, काम-भोग र [बहुवचनात्] राग-द्वेषमा कम्मर कस्ने यस्ता पुरुषहरू अशुचि नरकमा खस्तछन ॥ १६ ॥ परन्तु जो मनुष्य ज्ञान (धर्म) शील छन् ती ता श्रेष्ठ गतिमा जान्छन् । पाप-कर्ममा लागेकाहरू दुःखसँग यम-यातना भोग्दछन् ॥ १७ ॥ पापीहरूको यस लोकको दुःख जस्तो हुन्छ र मरेपछि जसरी यम-यातना भोग्दछन् सो कुरा पनि सुन ॥१८॥ (यस लोकमा हुने) पूर्वजन्ममा गरेको कर्म पाप होस् या धर्म होस् आफ्ना कर्मका योगले गर्दा यस लोकमा आएपछि कोही व्याधि उत्पन्न हुन्छ ॥ १९ ॥ कस्तो भने आधि-व्याधि अर्थात् मानसिक चिन्तादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कदाचित् सुखमासीनं वैकुण्ठे श्रीहरिं गुरुम् । विनयावनतो भूत्वा पप्रच्छ विनतासुतः ॥८॥
गरुड उवाच-भक्तिमार्गो बहुविधः कथितो भवता मम । तथा च कथिता देव ! भक्तानां गतिरुत्तमा ॥९॥
अधुना श्रोतुमिच्छामि यममार्गं भयङ्करम् । त्वद्भक्तिविमुखानां च तत्रैव गमनं श्रुतम् ॥१०॥
सुगमं भगवन्नाम जिह्वा च वशवर्तिनी । तथापि नरकं यान्ति धिग्धिगस्तु नराधमान् ॥११॥
अतो मे भगवन् ब्रूहि पापीनां या गतिर्भवेत् । यममार्गस्य दुःखानि यथा ते प्राप्नुवन्ति वै ॥१२॥
भगवानुवाच-वक्ष्येऽहं शृणु पक्षीन्द्र यममार्गं च येन ये । नरके पापिनो यान्ति शृण्वतामपि भीतिदम् ॥१३॥

निमित्त वर्णन गर्दछु ॥ ७ ॥ कोही बखत आनन्दसँग वैकुण्ठमा बसेका संसारका गुरु श्रीहरि भगवान्सँग विनयले नम्र भएर गरुडजी प्रश्न गर्न लागे ॥ ८ ॥ गरुडजी भन्दछन्—हे नारायण ! हरेक किसिमले हजूरले भक्ति-मार्ग मलाई बुझाउनु भयो, फेरि देव-भक्तहरूको उत्तम गति हुन्छ भन्ने पनि वर्णन गर्नुभयो ॥ ९ ॥ यस बखत भयङ्कर यमराजको मार्गकन सुन्न इच्छा गर्दछु । किनकि हजूरको भक्ति नगर्नेहरूले त्यहीं जानुपर्छ भन्ने सुनिएको छ । (सो कस्तो छ ?) ॥ १० ॥ नरक जानको कारण प्रस्ताव गर्दछन्—(एक दमड़ी खर्च गर्न नपर्ने) सित्तैं मिलेको हरिनाम छ । जिब्रो पनि आफ्नै अधीन छ, तैपनि हरि-नाम-कीर्तन नगरेर नरक जान्छन् (भने) त्यस्ता अधम नरलाई धिक्कार, धिक्कार छ ॥ ११ ॥ हे भगवन् ! यस निमित्त पापीहरूको जुन गति हुन्छ, जुन प्रकारले यम-मार्गको दुःख पाउँछन्, त्यो कुरा मलाई आज्ञा हवस् ॥ १२ ॥ यस्तो प्रश्न सुनी श्रीभगवान् आज्ञा गर्नुहुन्छ—हे पक्षिराज गरुड ! जुन कर्मले जो पापीहरू यम-मार्ग र नरक जान्छन् सो अत्यन्त डरलाग्दो कुरा म वर्णन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूतके यस्तु गृह्णन्ति तदज्ञानान्न दोषभाक् । दाता दोषमवाप्नोति याचकाय ददन्नपि ॥२५॥
प्रच्छाद्य सूतकं यस्तु ददत्यन्नं द्विजाय च । ज्ञात्वा गृह्णन्ति ये विप्रा दोषभाजस्त एव हि ॥२६॥
तस्मात् सूतकशुद्ध्यर्थं पितुः कुर्यात् सपिण्डनम् । ततः पितृगणैः सार्धं पितृलोकं स गच्छति ॥२७॥
द्वादशाहे त्रिपक्षे वा षण्मासे वत्सरेऽपि वा । सपिण्डीकरणं प्रोक्तं मुनिभिस्तत्त्वदर्शिभिः ॥२८॥
मया तु प्रोच्यते तार्क्ष्य ! शास्त्रधर्मानुसारतः । चतुर्णामेव वर्णानां द्वादशाहे सपिण्डनम् ॥२९॥
अत्यल्पात् कलिधर्माणां पुंसां चैवायुषः क्षयात् । अस्थिरत्वाच्छरीरस्य द्वादशाहे प्रशस्यते ॥३०॥
व्रतबन्धोत्सवादीनि व्रतस्योद्यापनानि च । विवाहादिर्भवेन्नैव मृते च गृहमेधिनि ॥३१॥

दिएको ग्रहण गर्ने दोषभागी हुँदैन । सूतकमा याचक (मागी खाने) लाई दिने दाता दोषभागी हुन्छ ॥ २५ ॥ सूतक छिपाई (लुकाएर) ब्राह्मण-लाई अन्न दान दिने र जो ब्राह्मण आशौच जानेर पनि ग्रहण गर्दछन् तिनै दोषभागी हुन्छन् ॥ २६ ॥ यस कारण सूतक शुद्धिका निमित्त पिताको सपिण्डी गरोस् ; त्यसो गर्नाले पितृगणका साथ त्यो पितृलोक जान्छ ॥ २७ ॥ बाह्रौं दिनमा, त्रिपक्षमा, छ महीना अथवा वर्ष दिनमा तत्त्व जान्ने मुनिहरूले सपिण्डी गर्नु भनेर कहिएको छ ॥ २८ ॥ हे गरुड़ ! मैले ता धर्मशास्त्र अनुसार चारै वर्णको सपिण्डी बाह्रौं दिन गर्नु भनेर बताएँ ॥२९॥ कलिको धर्म अनित्य हुनाले, मानिसको आयु पनि कम हुनाले र शरीर पनि स्थिर नहुनाले बाह्र दिनमा सपिण्डी गर्नु ठीक छ ॥ ३० ॥ घरको बूढो मरे व्रतबन्ध, उत्सव, व्रतप्रतिष्ठा, विवाह आदि कार्य गर्नु हुँदैन ॥ ३१ ॥ भिक्षु भिक्षा ग्रहण गर्दैन, हन्तकार (वैश्वदेव गर्ने मनुष्य द्वारा 'स्वाहा'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिक्षुर्भिक्षां न गृह्णाति हन्तकारो न गृह्यते। नित्यं नैमित्तिकं लुप्येद् यावत् पिण्डो न मेलितः॥३२॥
कर्मलोपात् प्रत्यवाया भवेत् तस्मात् सपिण्डनम्। निरग्निकः साग्निको वा द्वादशाहे समाचरेत् ॥३३॥
यत् फलं सर्वतीर्थेषु सर्वयज्ञेषु यत् फलम्। तत्फलं समवाप्नोति द्वादशाहे सपिण्डनात् ॥३४॥
अतः स्नात्वा मृतस्थाने गोमयेनोपलेपिते। शास्त्रोक्तेन विधानेन सपिण्डीं कारयेत् सुतः ॥३५॥
पाद्यार्घ्याचमनीयाद्यैर्विश्वेदेवांश्च पूजयेत्। कुपित्रे विकिरं दत्वा पुनश्चाप उपस्पृशेत् ॥३६॥
दद्यात् पितामहादीनां त्रीन् पिण्डांश्च यथाक्रमम्। वसुरुद्रार्करूपाणां चतुर्थं मृतकस्य च ॥३७॥
चन्दनैस्तुलसीपत्रै - र्धूपै - र्दीपैः सुभोजनैः। मुखवासैः सुवस्त्रैश्च दक्षिणाभिश्च पूजयेत् ॥३८॥

को उच्चारण साथ गरिने पञ्चयज्ञका अन्न) ग्रहण गरिंदैन; जहिलेसम्म पिण्ड मिल्दैन अर्थात् सपिण्डी हुँदैन—त्यतिञ्जेल नित्य नैमित्तिक कर्म सबै लुप्त हुन्छन् ॥ ३२ ॥ कर्म लोप हुनाले दोषभागी हुन्छ। यस कारण निरग्निक वा साग्निक होस् त्यसले बाह्रौं दिनमा सपिण्डी गरोस् ॥ ३३ ॥ सम्पूर्ण तीर्थ गर्नाले र यज्ञहरू गर्नाले जो फल पाइन्छ त्यो फल बाह्रौं दिनमा सपिण्डी गर्नाले पाइन्छ ॥ ३४ ॥ अतएव स्नान गरी मरेका ठाउँमा गोबरले लिपेर शास्त्रोक्त विधानद्वारा छोराले सपिण्डी गरोस् ॥ ३५ ॥ पाद्य, अर्घ्य, आचमनादिले विश्वेदेवहरूको पूजा गरी पृथिवीमा कुत्सित पितलाई विकिर नामक पिण्ड दिएर फेरि हात-पाउ धोएर आचमन गरोस् ॥ ३६ ॥ वसु, रुद्र, आदित्य स्वरूप भएका पितामहादिलाई तीन पिण्ड दिएर चौथो मृतकलाई देओस ॥ ३७ ॥ चन्दन, तुलसीपत्र, धूप-दीप, असल भोजन, मुखवास (पान, सुकमेल आदि) उत्तम वस्त्रहरू र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

प्रेतपिण्डं त्रिधा कृत्वा सुवर्णस्य शलाकया। पितामहादिपिण्डेषु मेलयेत् तं पृथक्पृथक् ॥३९॥
पितामह्या समं मातुः पितामहसमं पितुः। सपिण्डीकरणं कुर्यादिति तार्क्ष्य! मतं मम ॥४०॥
मृते पितरि यस्याथ विद्यते च पितामहः। तेन देयास्त्रयः पिण्डाः प्रपितामहपूर्वकाः ॥४१॥
तेभ्यश्च पैतृकं पिण्डं मेलयेत् तं त्रिधा कृतम्। मातर्यग्रे प्रशान्तायां विद्यते च पितामही ॥४२॥
तदा मातृकश्राद्धेऽपि कुर्यात् पितृकवद्‌विधिम्। यद् वा मयि महालक्ष्म्यां तयोः पिण्डं च मेलयेत् ॥४३॥
अपुत्रायाः स्त्रियाः कुर्यात् पतिः सापिण्डनादिकम्। श्वश्र्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत् ॥४४॥

दक्षिणाहरूले पनि पिण्ड पूजा गरोस ॥ ३८ ॥ सुवर्णको तारहे प्रेत पिण्डको तीन भाग लगाए पितामहादिका पिण्डमा प्रेतको पिण्ड अलग-अलग मिलाओस् ॥ ३९ ॥ हे गरुड़जी ! पितामही समान आमाको र पितामह समान बाबुको सपिण्डी गरोस्—यो मेरो मत हो ॥ ४० ॥ जसको बाबु मर्‍यो, बुढो बाबु (बाजे) बाँचेकै छ भने, त्यसले प्रपितामहपूर्वक अर्थात् वृद्धप्रपितामहदेखि लिएर तीन पिण्ड देओस् ॥ ४१ ॥ पिताको पिंडलाई तीन भाग गरेर प्रपितामहादिका पिण्डमा मिलाओस्। आमा पहिले मरी पितामही बाँचेकै छ भने मातृका श्राद्धमा पनि पिताका सपिण्डीको विधिले गरोस् अर्थात् प्रपितामही आदि तीनलाई पिण्ड दिएर आमाको पिण्ड मिलाओस्। पक्षान्तर बताउँदछन्—अथवा ती माता-पिताको पितामहरूप (नारायण) मा पिताको र पितामही रूप महालक्ष्मीमा आमाको पिण्ड मिलाओस् ॥ ४२ ॥ ४३ ॥ पुत्ररहित भएकी स्त्रीको सापिण्डनादिक पतिले गरोस्। सासु आदिका साथैमा मृत-स्त्रीको सपिण्डीकरण गर्नू ॥ ४४ ॥ हे गरुड़ ! स्त्रीको पति आदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भर्त्रादिभिस्त्रिभिः कार्यं सपिण्डीकरणं स्त्रियाः । नैतन्मम मतं तार्क्ष्य ! पत्या सापिण्ड्यमर्हति ॥४५॥
एकां चितां समारूढौ दम्पती यदि काश्यप ! तृणमन्तरतः कृत्वा श्वशुरादेस्तदा चरेत् ॥४६॥
एक एव सुतः कुर्यादादौ पिण्डादिकं पितुः । तदूर्ध्वं च प्रकुर्वीत सत्याः स्नानं पुनश्चरेत् ॥४७॥
हुताशं या समारूढा दशाहाभ्यन्तरे सती । तस्या भर्तुर्दिने कार्यं शय्यादानं सपिण्डनम् ॥४८॥
कृत्वा सपिण्डनं तार्क्ष्य ! प्रकुर्यात् पितृतर्पणम् । उदाहरेत् स्वधाकारं वेदमन्त्रैः समन्वितम् ॥४९॥
अतिथिं भोजयेत् पश्चाद् हन्तकारं च सर्वदा । तेन तृप्यन्ति पितरो मुनयो देवदानवाः ॥५०॥
ग्रासमात्रा भवेद् भिक्षा चतुर्ग्रासं तु पुष्कलम् । पुष्कलानि च चत्वारि हन्तकारो विधीयते ॥५१॥

तीन पुरुषका साथ सपिण्डी गर्नू । यो मेरो मत होइन । त्यो स्त्री पतिका साथ सपिण्डीकरण गर्ने योग्य छैन ॥ ४५ ॥ हे गरुड ! दम्पति (लोग्ने-स्वास्नी) एक चितामा चढेका भए ससुरा आदिका बीच तृण राखेर सपिण्डी गरोस ॥ ४६ ॥ पहिले एउटै पुत्रले पिताको पिंडादिक दान गरोस , त्यहाँपछि सतीलाई पिण्डादिक दिई स्नान गरोस् ॥ ४७ ॥ जो पतिव्रता दस दिन भित्र अग्नि-प्रवेश गर्दछे, त्यसको शय्यादान, सपिण्डन पतिका पघारौं बार्हौं दिनमा गर्नू ॥ ४८ ॥ हे गरुड ! सपिंडन गरेर पितृ तर्पण गरोस् । वेदका मन्त्रले सहित स्वधाकार उच्चारण गरोस् ॥ ४९ ॥ पश्चाद् अतिथिलाई भोजन गराई हन्तकार (बलिवैश्वदेव) पनि सधैं गरोस् , त्यसो गर्नाले पितृहरू, मुनिहरू र देव-दानवहरू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MHRD

अत ऊर्ध्वं स्वजात्युक्तमाशौचं तासु विद्यते। सद्यः शौचं सपिण्डानां गर्भस्य पतने सति ॥१८॥
सर्वेषामेव वर्णानां सूतके मृतकेऽपि वा। दशाहाच्छुद्धिरित्येष कलौ शास्त्रस्य निश्चयः ॥१९॥
आशीर्वादं देवपूजां प्रत्युत्थानाभिवन्दनम्। पर्यङ्के शयनं स्पर्शं न कुर्यान् मृतसूतके ॥२०॥
सन्ध्या दानं जपं होमं स्वाध्यायं पितृतर्पणम्। ब्रह्मभोज्यं व्रतं नैव कर्तव्यं मृतसूतके ॥२१॥
नित्यं नैमित्तिकं काम्यं सूतके यः समाचरेत्। तस्य पूर्वकृतं नित्यादिकं कर्म विनश्यति ॥२२॥
व्रतिनो मन्त्रपूतस्य साग्निकस्य द्विजस्य च। ब्रह्मनिष्ठस्य यतिनो न हि राज्ञां च सूतकम् ॥२३॥
विवाहोत्सव - यज्ञेषु जाते च मृतसूतके। तस्य पूर्वकृतं चान्नं भोज्यं तन्मनुरब्रवीत् ॥२४॥

गर्भ स्राव भएमा सपिण्डहरूलाई सद्यः शौच कहिएको छ, अर्थात् स्नान गर्नाले शुद्ध हुन्छन् र यसैलाई सद्यः शौच भन्दछन् ॥ १८ ॥ कलियुगमा सबै वर्णहरूको जन्म सूतक र मृतकमा पनि दश दिनले शुद्ध हुन्छ, यो शास्त्रको कलियुगमा निश्चय छ ॥ १९ ॥ आशीर्वाद, देवताको पूजा, प्रत्युत्थान, अभिवन्दन, खाटमा सुत्नु र स्पर्श यी मृत-सूतकमा नगरोस् ॥ २० ॥ सन्ध्या, दान, जप, होम, स्वाध्याय- पितृ-तर्पण, ब्राह्मण भोजन र व्रत पनि मृत-सूतकमा नगरोस् ॥ २१ ॥ जो मनुष्य नित्य, नैमित्तिक र काम्य कर्म सूतकमा गर्दछ; त्यसका पहिले गरिएका नित्य आदि सबै कर्म नष्ट हुन्छन् ॥ २२ ॥ व्रती, मन्त्रले पवित्र भएका, अग्निहोत्र ब्राह्मण, ब्रह्मनिष्ठ, गृहस्थी, यति र राजालाई पनि सूतक लाग्दैन ॥ २३ ॥ विवाह, यज्ञ र उत्सव गर्दा मृत-सूतक पर्न आयो भने सूतक नपरीकन बनाइएको अन्न खानु—यी मनुको वचन हो ॥ २४ ॥ सूतक नजानीकन सूत कमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आद्यभागद्वयं यावन् मृतकस्य च सूतके। द्वितीये पतिते चाद्यात् सूतकाच्छुद्धिरिष्यते ॥१२॥
आदन्तजननात् सद्य आचौलान्नैशिकी स्मृता। त्रिरात्रमात्रता देशाद् दशरात्रमतः परम् ॥१३॥
आजन्मतस्तु चौलान्तं यत्र कन्या विपद्यते। सद्यः शौचं भवेत् तत्र सर्ववर्णेषु नित्यशः ॥१४॥
ततो वाग्दानपर्यन्तं यावदेकाहमेव हि। अतः परं प्रवृद्धानां त्रिरात्रमिति निश्चयः ॥१५॥
वाक्प्रदाने कृते त्वत्र ज्ञेयं चोभयतस्त्र्यहम्। पितुर्वरस्य च ततो दत्तानां भर्तुरेव हि ॥१६॥
षण्मासाभ्यन्तरे यावद् गर्भस्रावो भवेद् यदि। तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ॥१७॥

आद्य दुइ भागमा अर्थात् छ दिन भएआ दोस्रो सूतक पर्न आयो भने पहिला सूतकमा नै मिलाएर शुद्धि जान्नू ॥ १२ ॥ दाँत उत्पन्न भएका बालकको सद्यः शौच जान्नू अर्थात् स्नान मात्रले शुद्ध हुन्छ। चूड़ा नभएको बालक मरेमा एक रात सूतक जान्नू। व्रतबन्ध नभएकाको तीन रात त्यहाँभन्दा बढ़ताको दश रात सूतक जान्नू ॥ १३ ॥ जन्मदेखि चूड़ापयन्त अर्थात् सत्ताइस महीना भित्रकी कन्या मरे सबै वर्णमा सधैं सद्यः शौच जान्नू अर्थात् स्नान मात्रले शुद्धि हुन्छ ॥ १४ ॥ वाग्दानपर्यन्तका कन्याको एक दिन सूतक जान्नू। यहाँदेखि बढीका कन्याको तीन रात सूतक लाग्दछ, यस्तो निश्चय गरिएको छ ॥ १५ ॥ बाग्दान गरेकी कन्या मरेमा दुवै कुलमा तीन दिन सूतक जान्नू अर्थात् पितृकुलमा तीन दिन र बर-कुलमा पनि तीन दिन सूतक लाग्दछ। वरलाई दिइसकेकी कन्या मरे पति-कुलमा मात्रै सूतक जान्नू ॥ १६ ॥ छ महीना भित्र गर्भ तुहे जति महीनाको गर्भ छ, त्यति दिनमा तिनीहरूको शुद्धि हुए छ ॥ १७ ॥ यहाँदेखि उपरान्त स्वजातिमा कहिएको आशौच ती माताहरूमा रहन्छ।

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoE

ब्राह्मणस्तु दशाहेन क्षत्रियो द्वादशेऽहनि । वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्धयति ॥६॥
दशाहेन सपिण्डास्तु शुद्धयन्ति प्रेतसूतके । त्रिरात्रेण सकुल्यास्तु स्नात्वा शुद्धयन्ति गोत्रजाः ॥७॥
चतुर्थे दशरात्रं स्यात् षण्निशाः पुंसि पञ्चमे । षष्ठे चतुरहः प्रोक्तं सप्तमे च दिनत्रयम् ॥८॥
अष्टमे दिनमेकं तु नवमे प्रहरद्वयम् । दशमे स्नानमात्रं हि मृतकं जन्मसूतकम् ॥९॥
देशान्तरगतः कश्चिच्छृणुयाद् योऽहनिर्दशम् । यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥१०॥
अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् । संवत्सरे व्यतीते तु स्नानमात्राद् विशुद्धयति ॥११॥

यथोचित सूतक तिमीलाई बताउँदछु ॥ ५ ॥ ब्राह्मण दस दिनमा शुद्ध हुन्छ, क्षत्रिय बाह्र दिनमा, वैश्य पन्ध्र दिनमा तथा शूद्र महीना दिनमा शुद्ध हुन्छ ॥ ६ ॥ मरेका सूतकमा दश दिनमा सपिण्ड शुद्ध हुँन्छन् , मृतक-कुलका तीन रातमा र सगोत्री स्नान गर्नाले शुद्ध हुन्छन् ॥ ७ ॥ चौथो पुस्तासम्मकालाई दश रात सूतक लाग्दछ, पाँचौं पुस्ताको पुरुषमा छ रात सूतक रहन्छ, छैठौं पुस्तामा चार दिन र सातौं पुस्तामा तीन दिन सूतक रहन्छ ॥ ८ ॥ आठौं पुस्तामा एक दिन, नवौं पुस्तामा दुई प्रहर र दशौं पुस्तामा स्नान गर्नाले मृत सूतक जान्छ ; यस्तै जन्म सूतक पनि जान्नू ॥ ९ ॥ देशान्तरमा गएर कुनै व्यक्तिले आफ्ना कुलको सूतक दश दिन भित्र सुने दश-रात्रमा बाँकी रहेका जो दिन-रात छन् त्यति नै सूतक जान्नू ॥ १० । दश दिन बितेको भए तीन रात अशुद्ध (सूतक) हुन्छ । बर्ष दिन बितेको भए स्नान मात्रले शुद्ध हुन्छ ॥ ११ ॥ मृत सूतकका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रयोदशोऽध्यायः

गरुड उवाच-सपिण्डनविधिं ब्रूहि सूतकस्य च निर्णयम् । शय्यापदानां सामग्रीं तेषां च महिमां प्रभो ॥१॥
भगवानुवाच-शृणु तार्क्ष्य प्रवक्ष्यामि सापिण्ड्याद्यखिलां क्रियाम् । प्रेतनाम परित्यज्य यया पितृगणे विशेत् २
न पिण्डो मिलितो येषां पितामहशिवादिषु । नोपतिष्ठन्ति दानानि पुत्रैर्दत्तान्यनेकधा ॥३॥
अशुद्धः स्यात् सदा पुत्रो न शुद्ध्यति कदाचन । सूतकान्तं निवर्तेत सपिण्डीकरणं विना ॥४॥
तस्मात् पुत्रेण कर्तव्यं सूतकान्ते सपिण्डनम् । सूतकान्तं प्रवक्ष्यामि सर्वेषां च यथोचितम् ॥५॥

श्रीगणेशाय नमः ॥ हरिः ॐ तत्-सत् ॥ गरुड प्रश्न गर्दछन्—हे भगवन् ! सपिण्डनको विधि; सूतकको निर्णय र शय्या, पद दानको विधि पनि बताइबक्सियोस् । हे प्रभो ! फेरि तिनको सामग्री र महिमा पनि आज्ञा होस् ॥ १ ॥ भगवान् आज्ञा गरिबक्सिन्छ—हे गरुड ! सापिण्ड्य आदि समस्त क्रिया तिमीलाई बताउँदछु, सुन—जुन क्रिया गर्नाले प्रेत नाम त्यागेर पितृगणमा प्रवेश गर्दछ ॥ २ ॥ वसु, रुद्र, आदित्य स्वरूप पितामहादिमा जसको पिण्ड मिलेको छैन, त्यसलाई पुत्रादिले दिएका अनेक प्रकारका दान प्राप्त हुँदैनन् ॥ ३ ॥ पुत्र सधैँ अशुद्धै रहन्छ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुर्यात् पिष्टमयीं लेख्यां नागभोगाकृतिं भुवि । अर्चयेत् तां सितैः पुष्पैः सुगन्धैश्चन्दनेन च ॥७५॥
प्रदद्याद् धूपदीपौ च तण्डुलांश्च तिलान् क्षिपेत् । आमपिष्टं च नैवेद्यं क्षीरं च विनिवेदयेत् ॥७६॥
सौवर्णं शक्तितो नागं गां च दद्याद् द्विजन्मने । कृताञ्जलिस्ततो ब्रूयात् प्रीयतां नागराडिति ॥७७॥
पुनस्तेषां प्रकुर्वीत नारायणबलिक्रियाम् । तया लभन्ते स्वर्वासं मुच्यन्ते सर्वपातकैः ॥७८॥
एवं सर्वक्रियां कृत्वा घटं सान्नं जलान्वितम् । दद्यादब्दं यथासंख्यान् पिण्डान् वा सजलान् क्रमात् ॥७९॥
एवमेकादशे कृत्वा कुर्यात् सापिण्डनं ततः । शय्यापदानां दानं च कारयेत् सूतके गते ॥८०॥

इति श्रीगरुडपुराणे सारोद्धारे एकादशदिनविधिनिरूपणं नाम द्वादशोऽध्यायः ॥ १२ ॥

पीठाको नाग बनाएर अथवा नागका शरीरको आकृति भूमिमा लेखेर सेता फूल, सुगन्धित द्रव्यहरू र चन्दनादिले त्यस नाग आकृतिको पूजन गरोस ॥ ७५ ॥ धूप-दीप गरेर चामल तिल छरी पिंधेको काँचो पीठो र दूधको नैवेद्य निवेदन गरोस् ॥ ७६ ॥ शक्ति अनुसार सुवर्णको नाग र गाई ब्राह्मणलाई दिएर हात जोरी नागराजा प्रसन्न हुनुहवस भनी प्रार्थना गरोस् ॥ ७७ ॥ फेरि तिनीहरूको नारायणबलि गरोस् । त्यो क्रिया गर्नाले स्वर्गमा वास पाउँदछन् र सब पातक देखि छुट्तछन् ॥ ७८ ॥ यस्ता प्रकारले सब क्रिया गरेर अन्न-जल सहित वर्ष दिनसम्मको घट देओस् (अर्थात् खोचा बगाओस्) अथवा क्रमैले जल सहित संख्यानुसार पिण्ड देओस् ॥ ७९ ॥ यो विधि एघारौं दिनमा गरेर त्यहाँपछि सपिण्डी गरी सूतक सकिएमा शय्या र पदहरू पनि दान गरोस् ॥ ८० ॥

इति श्रीगरुढपुराणे सारोद्धारे नेपालीभाषायां एकादशदिनविधिनिरूपण नाम बाह्रौं अध्याय समाप्त भयो ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितृ-पंक्ति-प्रवेशार्थं कारयेत् षोडशत्रयम् । एतच्छ्राद्धविहीनश्चेत् प्रेतो भवति सुस्थिरम् ॥६८॥
यावन्न दीयते श्राद्धं षोडशत्रयसंज्ञकम् । स्वदत्तं परदत्तं च तावन्नैवोपतिष्ठते ॥६९॥
तस्मात् पुत्रेण कर्त्तव्यं विधिना षोडशत्रयम् । भर्तुर्वा कुरुते पत्नी तस्य श्रेयो ह्यनन्तकम् ॥७०॥
सम्परेतस्य या पत्युः कुरुते चौर्ध्वदैहिकम् । क्षयाहं पाक्षिकं श्राद्धं सा सतीत्युच्यते मया ॥७१॥
उपकाराय सा भर्तुर्जीवत्येषा पतिव्रता । जीवितं सफलं तस्या या मृतं स्वामिनं भजेत् ॥७२॥
अथ कश्चित् प्रमादेन म्रियते वह्निवारिभिः । संस्कारप्रमुखं कर्म सर्वं कुर्यात् यथाविधिः ॥७३॥
प्रमादादिच्छया वापि नागाद्वा म्रियते यदि । पक्षयोरुभयोर्नागं पञ्चमीषु प्रपूजयेत् ॥७४॥

सुस्थिर प्रेत हुन्छ ॥ ६८ ॥ षोडशत्रय (४८) संज्ञा छ जसका यस्तो श्राद्ध जहिलेसम्म दिइँदैन ; त्यतिञ्जेलसम्म आफूले दिएको अथवा अर्काले दिएका दानको फल पाउँदैन ॥ ६९ ॥ तस्मात् छोरोले बिधिपूर्वक षोडशत्रय श्राद्ध गरोस । लोग्ने मरेका स्त्रीले औध्र्वदैहिक क्रिया गरी भने त्यसको अनन्त कल्याण हुन्छ ॥ तस्याः श्रेयो ह्यनन्तकमिति वा पाठः ॥ ७० ॥ जो स्त्री मरेका लोग्नेको औध्र्वदैहिक क्रिया गर्दछे र क्षयाह पाक्षिक श्राद्ध पनि गर्दछे भने त्यो सती हो भनेर मैले पनि भनेको छु ॥ ७१ ॥ लोग्नेको उपकार गर्नाका निमित्त जो पतिव्रता स्त्री जीवित रहन्छे; त्यो स्त्री बाँचेको सफल हो। जो मरेका पतिको पनि भजन गर्दछे ॥ ७२ ॥ त्यो प्रमाद वा आगो एवं पानीले मऱ्यो भने त्यसको विधिपूर्वक संस्कार आदि सबै कर्म गरोस ॥ ७३ ॥ प्रमाद वा इच्छाले अथवा सर्पले टोकेर कोही मऱ्यो भने दुवै पक्षको पञ्चमी तिथिमा नागको पूजा गरोस ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आदि सबै कर्म गरोस ॥ ७२ ॥ प्रमाद वा इच्छाले ... तिथिमा नागको पूजा गरोस ॥ ७३ ॥

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoE

चतुर्थं सोमराजाय हव्यवाहाय पञ्चमम्। कव्यवाहाय षष्ठं च दद्यात् कालाय सप्तमम् ॥६१॥
रुद्राय चाष्टमं दद्यान् नवमं पुरुषाय च। प्रेताय दशमं चैवैकादशं विष्णवे नमः ॥६२॥
द्वादशं ब्रह्मणे दद्याद् विष्णवे च त्रयोदशम्। चतुर्दशं शिवायैव यमाय दशपञ्चकम् ॥६३॥
दद्यात् तत्पुरुषायैव पिण्डं षोडशकं खग! मध्यं षोडशकं प्राहुरेतत् तत्त्वविदो जनाः ॥६४॥
द्वादश प्रतिमासेषु पाक्षिकं च त्रिपाक्षिकम्। न्यूनषाण्मासिक पिण्डं दद्यान्न्यूनाब्दिकं तथा ॥६५॥
उत्तमं षोडशं चैतन् मया ते परिकीर्तितम्। श्रपयित्वा चरुं तार्क्ष्य! कुर्यादेकादशेऽहनि ॥६६॥
चत्वारिंशत् तथैवाष्टौ श्राद्धं प्रेतत्वनाशनम्। यस्य जात विधानेन स भवेत् पितृपंक्तिभाक् ॥६७॥

पिण्ड देओस् ॥ ६१ ॥ आठौं रुद्रलाई, नवौं पुरुषलाई, दशौं प्रेतलाई, एघारौं विष्णुलाई पिण्ड देओस् ॥ ६२ ॥ बाह्रौं ब्रह्मालाई; तेह्रौं विष्णुलाई चौधौं शिवजीलाई र पन्ध्रौं यमराजलाई देओस् ॥ ६३ ॥ हे गरुड ! सोह्रौं पिण्ड मृत-व्यक्तिलाई देओस। तत्त्व जान्ने भएका मानिस यसैलाई मध्य षोडशी भन्दछन् ॥ ६४ ॥ बाह्र मैन्हाहरूमा पाक्षिक, त्रिपाक्षिक, न्यून षाण्मासिक (६ महीनामा एक दिन कम) र न्यूनाब्दिक (वर्ष दिनमा एक दिन कम) पिण्ड देओस ॥ ६५ ॥ हे गरुड! यो उत्तम षोडशी पिण्ड मैले तिमीलाई बताएं। एघारौं दिनमा चरु (खीर) पकाएर पिण्ड देओस ॥ ६६ ॥ चालीस तथा आठ अर्थात् ४८ श्राद्ध जसका विधिपूर्वक भएका छन्; त्यसको प्रेतत्व नाश हुन्छ र पितृ पंक्ति भाक् हुन्छ अर्थात् पितृका गणनामा प्राप्त हुन्छ ॥ ६७ ॥ पितृका पंक्तिमा प्रवेश गराउनका निमित्त ४८ श्राद्ध गरोस। यी ४८ श्राद्धले ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पति-पुत्रवती नारी द्वयोरग्रे मृता यदि ! वृषोत्सर्गं न कुर्वीत दद्याद् गां च पयस्विनीम् ॥५४॥
वृषभं वाहयेद् यस्तु स्कन्धे पृष्ठे च खेचर ! स पतेन्नरके घोरे यावदाभूतसंप्लवम् ॥५५॥
वृषभं ताडयेद् यस्तु निर्दयो मुष्टि-यष्टिभिः । स नरः कल्पपर्यन्तं भुनक्ति यमयातनाम् ॥५६॥
एवं कृत्वा वृषोत्सर्गं कुर्याच्छ्राद्धानि षोडश । सपिण्डकरणादर्वाक् तदहं कथयामि ते ॥५७॥
स्थाने द्वारेऽर्धमार्गे च चितायां शवहस्तके । अस्थिसञ्चयने षष्ठो दश पिण्डा दशाह्निकाः ॥५८॥
मलिनं षोडशं चैतत् प्रथमं परिकीर्तितम् । अन्यच्च षोडशं मध्ये द्वितीयं कथयामि ते ॥५९॥
प्रथमं विष्णवे दद्याद् द्वितीयं श्रीशिवाय च । यमाय परिवाराय तृतीयं पिण्डमुत्सृजेत् ॥६०॥

दान देओस् ॥ ५४ ॥ हे गरुड ! जो साँढे छाडेका गोरूलाई जोत्तछ अथवा पीठमा भारी बोकाउँदछ, त्यो महाप्रलयसम्म घोर नरकमा पर्दछ ॥ ५५ ॥ जो निर्दयी मनुष्य मुट्ठी या लाठीले हिर्काउँदछ; त्यो मानिस कल्पपर्यन्त यमराजको यातना (दुःख) भोग्दछ ॥ ५६ ॥ यस्ता प्रकारले वृषोत्सर्ग गरेर सोह्र श्राद्ध पनि गरोस् । सपिण्डीदेखि पहिलेको कर्तव्य म तिमीलाई बताउँदछु ॥ ५७ ॥ मृतस्थानमा १, ढोकामा २, आधा बाटामा ३, चितामा ४, मृतकका हातमा ५ र अस्थिसञ्चयमा ६ । यी छओटा र दश दिनका १० पिण्ड देओस् ॥ ५८ ॥ पहिलो १६ पिण्डको जुन विधि मैले बताएँ त्यो मलिन हो । अब दोस्रो षोडश पिण्डको विधि तिमीलाई बताउँदछु ॥ ५९ ॥ पहिलो विष्णुलाई, दोस्रो शिवजीलाई, तेस्रो परिवार सहित यमराजलाई पिण्डदान देओस ॥ ६० ॥ चौथो सोमराजलाई, पाँचौं हव्यवाहलाई, छैठौं कव्यवाहलाई र सातौं काललाई

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

जपैर्होमैस्तथा दानैः प्रकुर्याद् देहशोधनम् । पूर्ववत् सकलं कृत्यं कुर्याद्धोमादिलक्षणम् ॥४७॥
शालिग्रामं च संस्थाप्य वैष्णवं श्राद्धमाचरेत् । आत्मश्राद्धं ततः कुर्याद् दद्याद् दानं द्विजन्मने॥४८॥
एवं यः कुरुते पक्षिन् नपुत्रश्चापि पुत्रवान् । सर्वकामफलं तस्य वृषोत्सर्गात् प्रजायते ॥४९॥
अग्निहोत्रादिभिर्यज्ञैर्दानैश्च विविधैरपि । न तां गतिमवाप्नोति वृषोत्सर्गेण यां लभेत् ॥५०॥
बाल्ये कौमार पौगण्डे यौवने वार्धके कृतम् । यत्पापं तद् विनश्येत वृषोत्सर्गात् प्रमुच्यते ॥५१॥
मित्रद्रोही कृतघ्नश्च सुरापी गुरुतल्पगः । ब्रह्महा हेमहारी च वृषोत्सर्गात् प्रमुच्यते ॥५२॥
तस्मात् सर्वप्रयत्नेन वृषयज्ञं समाचरेत् । वृषोत्सर्गसमं पुण्यं नास्ति तार्क्ष्य! जगत्त्रये ॥५३॥

गरेर विष्णु सम्बन्धी श्राद्ध गरी आत्मश्राद्ध पनि गरेर ब्राह्मणलाई दान देओस ॥ ४८ ॥ हे पक्षिन् ! यो छोरो हुने अथवा छोरो नहुने जो गर्दछ; वृषोत्सर्ग गरेको प्रभावले त्यसका सबै कामना पूर्ण हुन्छन् ॥ ४९ ॥ वृषोत्सर्ग गर्नाले जुन गति पाइन्छ, त्यो गति अग्निहोत्रादि यज्ञ गर्नाले र अनेक प्रकारका दानहरू दिनाले पनि पाइन्न ॥ ५० ॥ बाल्यावस्था, कुमार पौगण्ड, यौवन र बुढ्याइँमा गरिएका पाप वृषोत्सर्ग गर्नाले नाश हुन्छ यसमा सन्देह छैन ॥ ५१ ॥ मित्रद्रोही, कृतघ्न (गरेको उपकार नमान्ने) मदिरा पिउने, गुरुकी स्त्रीसित भोग गर्ने· ब्राह्मणलाई मार्ने र सुन चोर्ने पनि वृषोत्सर्ग गर्नाले पापबाट मुक्त हुन्छ ॥ ५२ ॥ यस कारण सर्वप्रयत्न द्वारा वृषयज्ञ गरोस; हे गरुड ! वृषोत्सर्ग समान पुण्य भएको तीन लोकमा अरु कोही यज्ञ छैन ॥ ५३ ॥ पति र छोरो भएकी नारी, पति र छोरो जीवित छँदै मरी भने वृषोत्सर्ग नगरेर केवल दूध दिने गाई

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिशूलं दक्षिने पार्श्वे वामे चक्रं प्रदापयेत् । तं विमुच्याञ्जलिं बद्ध्वा पठेन्मन्त्रमिमं सुतः ॥४०॥
धर्मस्त्वं वृषरूपेण ब्रह्मणा निर्मितः पुरा । तवोत्सर्गप्रदानेन तारयस्व भवार्णवात् ॥४१॥
इति मन्त्रान् नमस्कृत्य वत्सं वत्सीं समुत्सृजेत् । वरदोऽहं सदा तस्य प्रेतमोक्षं ददामि च ॥४२॥
तस्मादेष प्रकर्त्तव्यस्तत्फलं जीवितो भवेत् । अपुत्रस्तु स्वयं कृत्वा सुखं याति परांगतिम् ॥४३॥
कार्तिकादौ शुभे मासे चोत्तरायणगे रवौ । शुक्लपक्षेऽथवा कृष्णे द्वादश्यादितिथौ तथा ॥४४॥
ग्रहणद्वितये चैव पुण्यतीर्थेऽयनद्वये । विषुवद्द्वितये चापि वृषोत्सर्गं समाचरेत् ॥४५॥
शुभे लग्ने मुहूर्त्ते च शुचौ देशे समाहितः । ब्राह्मणं तु समाहूय विधिज्ञं शुभलक्षणम् ॥४६॥

॥ ४० । मन्त्रार्थ—पहिले ब्रह्माजीले वृष रूपले बनाइएका तिमी धर्मस्वरूप हौ, तिम्रो उत्सर्ग गर्नाले भवार्णवदेखि तिमीले तार ॥ ४१ ॥ यस मन्त्रले नमस्कार गरेर छाडिदेओस् । त्यस्तालाई सधैं अभिलषित वस्तु र प्रेतलाई मोक्ष पनि म दिन्छु, यो नारायणको वचन हो ॥ ४२ ॥ तस्मात् छोरोले अवश्य वृषोत्सर्ग गर्नु र बाँचेको सफल हुन्छ ॥ ४३ ॥ कार्तिक आदि शुभ महिनामा, सूर्य उत्तरायण भएका बखत, शुक्लपक्ष अथवा कृष्णपक्षमा द्वादशी आदि तिथिमा, सूर्य-चन्द्र ग्रहणमा; पवित्र तीर्थमा, श्रावण संक्रान्ति र माघ संक्रान्तिमा, कार्तिक सङ्क्रान्ति र वैशाख सङ्क्रान्तिमा पनि वृषोत्सर्ग गरोस् ॥ ४४ ॥ ४५ ॥ शुभलग्नमा, शुभमुहूर्तमा, शुद्ध देशमा सावधान भएर विधि जान्ने शुभलक्षण भएको ब्राह्मणलाई बोलाएर, जप होम तथा दानद्वारा देह शुद्ध गरोस्, पहिलेका झैं होमादि लक्षण भएका सबै विधि गरोस् ॥ ४६ ॥ ४७ ॥ शालिग्रामको स्थापना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रौरवादिषु ये केचित् पच्यन्ते यस्य पूर्वजाः। वृषोत्सर्गेण तान् सर्वांस्तारयेदेकविंशतिम् ॥३३॥
वृषोत्सर्गं किलेच्छन्ति पितरः स्वर्गता अपि। अस्मद्वंशे सुतः कोऽपि वृषोत्सर्गं करिष्यति॥३४॥
तदुत्सर्गाद् वयं सर्वे यास्यामः परमां गतिम्। सर्वयज्ञेषु चास्माकं वृषयज्ञो हि मुक्तिदः ॥३५॥
तस्माद् पितृविमुक्त्यर्थं वृषयज्ञं समाचरेत्। यथोक्तेन विधानेन कुर्यात् सर्वं प्रयत्नतः ॥३६॥
ग्रहाणां स्थापनं कृत्वा तत्तन्मन्त्रैश्च पूजनम्। होमं कुर्याद् यथाशास्त्रं पूजयेद् वृषमातुरः ॥३७॥
वत्सं वत्सीं समानाय्य बध्नीयात् कङ्कणं तयोः। वैवाह्येन विधानेन स्तम्भमारोपयेत् तदा ॥३८॥
स्नापयेच्च वृषं वत्सीं रुद्रकुम्भोदकेन च। गन्धमाल्यैश्च सम्पूज्य कारयेच्च प्रदक्षिणाम् ॥३९॥

॥ ३३ ॥ स्वर्गमा गएका पितृहरू पनि निश्चय वृषोत्सर्गको इच्छा गर्दछन् कि हाम्रा वंशमा कोही पुत्र वृषोत्सर्ग गरोस् ॥ ३४ ॥ वृषोत्सर्ग गर्नाले हामी सबै परम गतिमा प्राप्त हुनेछौं। हाम्रा निमित्त सब यज्ञमा वृषोत्सर्ग नै मुक्तिदायक छ ॥ ३५ ॥ यसै कारण शास्त्रोक्त विधानद्वारा प्रयत्न-पूर्वक पितृ-मुक्तिका निमित्त वृष-यज्ञ गरोस ॥ ३६ ॥ ग्रहहरूको स्थापना गरेर ती ग्रहका तत्-तत् मन्त्रले पूजा गरोस्, शास्त्रका विधिले हवन तथा वृषको पूजन गरोस। "पूजयेत् वृषभं सुतः" यो पाठान्तर हो ॥ ३७ ॥ बाछा-बाछी ल्याएर ती दुवैलाई कङ्कण बाँधिदेओस र विवाहका विधिले स्तम्भ गाडोस ॥ ३८ ॥ रुद्र कुम्भका जलले बाछो-बाछी दुवैलाई स्नान गराइदेओस र गन्ध (चन्दन) मालाले पूजा गरेर प्रदक्षिणा गरोस ॥ ३९ ॥ दक्षिण पातामा त्रिशूलले र बायाँ पातामा चक्रले डामी त्यसलाई छोड़ी अञ्जलि जोरेर छोरोले यो मन्त्र पढोस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वांगेष्वेकवर्णो यः पिङ्गः पुच्छे खुरेषु च । तं नीलपिङ्गमित्याहुः पूर्वजोद्धारकारकम् ॥२७॥
पारावतसवर्णास्तु ललाटे तिलकान्वितः । तं बभ्रुनीलमित्याहुः पूर्णां सर्वाङ्गशोभनम् ॥२८॥
नीलः सर्वशरीरेषु रक्तश्च नयनद्वये । तमप्याहुर्महानीलं नीलः पञ्चविधः स्मृतः ॥२९॥
अवश्यमेव भोक्तव्यो न स धार्यो गृहे भवेत् । तदर्थमेषा चरति लोके गाथा पुरातनी ॥३०॥
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् । गौरीं विवाहयेत् कन्यां नीलं वा वृषमुत्सृजेत् ॥३१॥
स एव पुत्रो मन्तव्यो वृषोत्सर्गं तु यश्चरेत् । गयायां श्राद्धदाता च योऽन्यो विष्ठासमः किल॥३२॥

र पुच्छरमा पहेंलो वर्ण भएको फेरि खुर र सिङमा पिङ्गल वर्ण भएको यस्तो वृष रक्त-नील भनेर कहिन्छ ॥ २६ ॥ सर्वाङ्गमा एक वर्ण भई पुच्छर र खुरमा पिङ्गल वर्ण भएको जो वृष हो त्यो पिता पुर्खालाई उद्धार गर्ने नील पिङ्गल भनेर कहिन्छ ॥ २७ ॥ परेवाको जस्तो वर्ण भई निधारमा तिलक छ जसको त्यसलाई बभ्रुनील भन्दछन्, त्यो सर्वाङ्गले शोभित पूर्ण हुन्छ ॥ २८ ॥ सर्व शरीरमा नीलवर्ण भई आँखा दुइमा रातो वर्ण छ जसका यस्तो वृष महानील भनी कहिएको छ। नीलवृष पाँच प्रकारका हुन्छन् ॥ २९ ॥ वृषलाई अवश्य अवश्य छाड़िदिनु घरमा नराख्नु। यसैका निमित्त लोकमा पुरानु गाथा पनि प्रचलित भएको छ ॥ ३० ॥ धेरै छोरा पैदा गर्नाको इच्छा गर्नु किनकि यौटा मात्रको पनि गया जाने सम्भावना हुन्छ अथवा गौरी कन्या विवाह गरोस् या नील-वृष छाड़ोस् ॥ ३१ ॥ त्यही पुत्र भनेर कहिएको छ जो वृषोत्सर्ग गर्दछ अथवा गया श्राद्ध गर्दछ अरु विष्टा समान जान्नू ॥ ३२॥ पिता-पुर्खा कोही रौरव नरकमा परेका छन् भने- त्यसले वृषोत्सर्ग गरेर २१ कुल सबै तारोस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं शय्याप्रदानेन श्राद्धेन नवकादिना । वृषोत्सर्गविधानेन प्रेतो याति परां गतिम् ॥२०॥
एकादशेऽह्नि विधिना वृषोत्सर्गं समाचरेत् । हीनाङ्गं रोगिणां बालं त्यक्त्वा कुर्यात् सलक्षणम्॥२१॥
रक्ताक्षः पिङ्गलो यस्तु रक्तः शृङ्गे गले खुरे । श्वेतोदरः कृष्णपृष्ठो ब्राह्मणस्य विधीयते ॥२२॥
सुस्निग्धवर्णो यो रक्तः क्षत्रियस्य विधीयते । पीतवर्णश्च वैश्यस्य कृष्णः शूद्रस्य शस्यते ॥२३॥
यस्तु सर्वाङ्गपिङ्ग स्याच्छ्वेतः पुच्छे पदेषु च । स पिङ्गो वृष इत्याहुः पितृणां प्रीतिवर्धनः ॥२४॥
चरणास्तु मुखं पुच्छं यस्य श्वेतानि गोपतेः । लाक्षारससवर्णो यः स नाल इति कीर्तितः ॥२५॥
लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः । पिङ्गः खुरविषाणाभ्यां रक्तनीलो निगद्यते ॥२६॥

॥ १९ ॥ यस प्रकार शय्या दिनाले, श्राद्ध गर्नाले र विधिपूर्वक वृषोत्सर्ग गर्नाले पनि प्रेत श्रेष्ठ गतिमा प्राप्त हुन्छ ॥ २० ॥ एघारौं दिन शास्त्रोक्त विधिले वृषोत्सर्ग गरोस् । हीनाङ्ग, रोगी र बालकलाई छाडेर लक्षण सहितको वृष दान गरोस् ॥ २१ ॥ राता आँखा भई पिङ्गल वर्ण भएको सींङ, गला र खुरमा पनि रातो भएको फेरि पेटमा सेतो वर्ण भई कालो पीठ भएको यस्तो वृष ब्राह्मणका लागि बिहित छ ॥ २२ ॥ खूब असल चिल्लो भई रातो वर्ण भएको यस्तो वृष क्षत्रियकालागि बिहित छ । पहेंलो वर्ण भएको वैश्यको र कालो वर्ण भएको वृष शूद्रको कहिएको छ ॥ २३ ॥ जो सर्वाङ्ग पहेंलो वर्ण भई पुच्छर र खुट्टामा जसको सेतो छ यस्तो बृष पिङ्ग भनी कहिन्छ, त्यो पितृहरूको प्रीति बढाउने हुन्छ ॥ २४ ॥ लोहाका रसको जस्तो वर्ण भई चरण र पुच्छर सेता छन् जुन वृषका त्यो वृष नील भनेर कहिन्छ ॥ २५ ॥ सम्पूर्ण शरीरमा रातो वर्ण भई मुख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोदानं च ततो दद्यात् पितॄणां तारणाय वै। गौरेषा हि मया दत्ता प्रीतये तेऽस्तु माधव ! ॥१३॥
उपभुक्तं तु तस्यासीद् वस्त्रं भूषणवाहनम्। घृतपूर्णं कांस्यपात्रं सप्तधान्यं तदीप्सितम् ॥१४॥
तिलाद्यष्टमहादानमन्तकाले न यत् कृतम्। शय्यासमीपे धृत्वैतद् दानं तस्य प्रदापयेत् ॥१५॥
प्रक्षाल्य विप्रचरणौ पूजयेदम्बरादिभिः। सिद्धान्नं तस्य दातव्यं योदकाऽपूपकाः पयः ॥१६॥
स्थापयेत् पुरुषं हैमं शय्योपरि तदा सुतः। पूजयित्वा प्रदातव्या मृतशय्या यथोदिता ॥१७॥
प्रेतस्य प्रतिमा युक्ता सर्वोपकरणैर्वृता। प्रेतशय्या मया ह्येषा तुभ्यं विप्र ! निवेदिता ॥१८॥
इत्याचार्याय दातव्या ब्राह्मणाय कुटुम्बिने। ततः प्रदक्षिणीकृत्य प्रणिपत्य विसर्जयेत् ॥१९॥

यी मैले दिएकी गाई हजूरको प्रीतिका निमित्त हवस् ॥ १३ ॥ मृत पुरुषले भोग गरिएका वस्त्र, भूषण, वाहन इत्यादि जो-जो हुन् ती र घृतपूर्ण कांस्यपात्र, सप्तधान्य मृत व्यक्तिका प्रिय वस्तु, फेरि (अन्त्य कालमा नगरिएका भए) तिलादि महादान—यी सबै शय्याका नजीक राखेर शय्या समेत दान देओस् ॥ १४ ॥ १५ ॥ ब्राह्मणको चरण धोएर वस्त्रादिले पूजा गरी पकाएको अन्न, लड्डु, मालपूआ, दूध इत्यादि ब्राह्मणलाई देओस् ॥ १६ ॥ फेरि सुवर्णको पुरुष बनाएर शय्यामाथि राखी पूजा गरेर जुन प्रकारले शय्यादान गर्नु भनेर शास्त्रमा कहियो त्यै विधिद्वारा छोराले शय्या दान गरोस् ॥ १७ ॥ सबै उपकरण सहित प्रेतका प्रतिमाले युक्त यो प्रेत-शय्या हे विप्र ! मैले तपाईंलाई निवदन गरें भनी ब्राह्मणको प्रार्थना गरोस् ॥ १८ ॥ यस्ता प्रकारले कुटुम्ब भएको आचार्य ब्राह्मणलाई देओस् र प्रदक्षिणा गरी प्रणाम गरेर विसर्जन गरोस्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्राह्मणको प्रार्थना गरोस् ॥ १८ ॥ यस्ता प्रका [illegible] दक्षिणा गरो प्रणाम गरेर विसर्जन गरोस्

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDI

सौवर्णं कारयेद्‌ विष्णुं ब्रह्माणं रौप्यकं तथा । रुद्रस्ताम्रमयः कार्यो यमो लोहमयः खग ! ॥६॥
पश्चिमे विष्णुकलशं गङ्गोदकसमन्वितम् । तस्योपरि न्यसेद्‌ विष्णुं पीतवस्त्रेण वेष्टितम् ॥७॥
पूर्वे तु ब्रह्मकलशं क्षीरोदकसमन्वितम् । ब्रह्माणं स्थापयेत् तत्र श्वेतवस्त्रेण वेष्टितम् ॥८॥
उत्तरस्यां रुद्रकुम्भं पूरितं मधुसर्पिषा । श्रीरुद्रं स्थापयेत् तत्र श्वेतवस्त्रेण वेष्टयेत् ॥९॥
दक्षिणस्यां यमघटमिन्द्रोदकसमन्वितम् । कृष्णवस्त्रेण संवेष्ट्य तस्योपरि यमं न्यसेत् ॥१०॥
मध्ये तु मण्डलं कृत्वा स्थापयेत् कौशिकं सुतः । दक्षिणाभिमुखो भूत्वाऽपसव्येन च तर्पयेत् ॥११॥
विष्णुं विधिं शिवं धर्मं वेदमन्त्रैश्च तर्पयेत् । होमं कृत्वा चरेत् पश्चाच्छ्राद्धं दशघटादिकम् ॥१२॥

सुवर्णको विष्णु, चाँदीको ब्रह्मा, तामाको रुद्र र फलामको धमराज बनाओस् र ॥ ६ ॥ पश्चिम दिशामा गङ्गाजलले युक्त विष्णुको कलश राखोस् र त्यसका उपर पहेंलो वस्त्र वेष्टित विष्णुको मूर्ति स्थापना गरोस् ॥ ७ ॥ पूर्वमा दूध पानीले युक्त ब्रह्म कलश राखोस् र त्यहाँ सेतो वस्त्रले वेष्टित ब्रह्माको मूर्ति स्थापना गरोस् ॥ ८ ॥ उत्तर दिशामा मह र घिउले पूर्ण घट राखेर त्यहाँ रातो वस्त्रले वेष्टित रुद्रको मूर्ति थापोस् ॥ ९ ॥ दक्षिणमा इन्द्रोदक समन्वित यम-घट राखेर त्यहाँ कालो वस्त्रले वेष्टित यमको मूर्ति स्थापना गरोस् ॥ १० ॥ मध्यम मण्डल बनाई कुशनिर्मित कौशिक ऋषि थापेर अपसव्य भएर दक्षिणाभिमुख भई छोरोले तर्पण गरोस् ॥ ११ ॥ ब्रह्मा, विष्णु, शिव, धर्मराज यिनलाई वेदका मन्त्रले तर्पण गरोस र होम गरिसकेपछि दश घटादिक श्राद्ध गरोस् ॥ १२ ॥ र पितृलाई तार्नाका निमित्त गोदान दिएर भनोस—हे माधव !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ द्वादशोऽध्यायः

गरुड़ उवाच–एकादशदिनस्यापि विधिं ब्रूहि सुरेश्वर ! वृषोत्सर्गविधानं च वद मे जगदीश्वर ! ॥१॥
भगवानुवाच–एकादशेऽह्नि गन्तव्यं प्रातरेव जलाशये । और्ध्वदेहिक्रिया सेवा करणीया प्रयत्नतः ॥२॥
निमन्त्रयेद्‌ ब्राह्मणांश्च वेदशास्त्रपरायणान्‌ । प्रार्थयेत्‌ प्रेतमुक्तिं च नमस्कृत्य कृताञ्जलिः ॥३॥
स्नानसन्ध्यादिकं कृत्वा ह्याचार्योऽपि शुचिर्भवेत्‌ । विधानं विधिवत्‌ कुर्यादेकादशदिनोचितम्‌ ॥४॥
आमन्त्रं कारयेत्‌ श्राद्धं दशाहं नामगोत्रतः । एकादशेऽह्नि प्रेतस्य दद्यात्‌ पिण्डं समन्त्रकम्‌ ॥५॥

गरुड़जी प्रश्न गर्दछन्–हे सुरेश्वर ! एकादश दिनमा गर्नुपर्ने विधि पनि बताइबक्सियोस्‌ । हे जगदीश्वर ! वृषोत्सर्गको विधान क्या हो ? त्यो पनि आज्ञा हओस्‌ ॥ १ ॥ श्रीभगवान्‌ आज्ञा गरिबक्सिन्छ–एघारौं दिन बिहानै जलाशयमा जानू र प्रयत्नपूर्वक सबै और्ध्वदैहिक क्रिया गर्नू ॥ २ ॥ वेद र शास्त्रमा परायण (पारंगत) भएका ब्राह्मणलाई निमन्त्रण गरोस । हात जोड़ी नमस्कार गरेर प्रेतको मुक्तिका निमित्त प्रार्थना गरोस्‌ ॥ ३ ॥ आचार्यले पनि स्नान सन्ध्या गरी शुद्ध पवित्र भएर बिधिपुर्वक एघारौं दिनको उचित विधान (कर्म) गराओस्‌ ॥ ४ ॥ दश दिनसम्म नाम गोत्र उच्चारण गरेर मन्त्र रहित श्राद्ध गराओस्‌ । एघारौं दिनमा मन्त्र सहित प्रेतलाई पिण्डदान देओस्‌ ॥ ५ ॥ हे गरुड़ !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दश दिनसम्म नाम गोत्र उच्चारण गरेर मन्त्रसहित श्राद्ध ... प्रेतलाई पिण्डदान देओस् ॥ ५ ॥ हे गरुड़!
CC-0. In Public Domain. Digitization by eGangotri. Funding: IKS

मिष्टान्नैर्भोजयेदेकं दिनेषु दशसु द्विजम्। प्रार्थयेत् प्रेतमुक्तिं च हरिं ध्यात्वा कृताञ्जलिः ॥३९॥
अतसीपुष्पसंकाशं पीतवाससमच्युतम्। ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥४०॥
अनादिनिधनो देवः शङ्ख-चक्र-गदाधरः। अक्षय्य पुण्डरीकाक्ष! प्रेतमोक्षप्रदो भव ॥४१॥
इति सम्प्रार्थनामन्त्रं श्राद्धान्ते प्रत्यहं पठेत्। स्नात्वा गत्वा गृहे दत्वा गोग्रासं भोजनं चरेत् ॥४२॥

इति श्रीगरुडपुराणे सारोद्धारे दशगात्रविधिनिरूपणं नाम एकादशोऽध्यायः ॥ ११ ॥

☆

र हात जोड़ी हरिको ध्यान गरेर प्रेतको मुक्तिका निमित्त प्रार्थना गरोस् ॥ ३९ ॥ अतसीका फूल जस्तो कान्ति भएका पहेंला वस्त्र छन् जसका यस्ता अविनाशी गोविन्द भगवान्लाई जो नमस्कार गर्दछन्, तिनीहरूका निमित्त कहीं भय छैन ॥ ४० ॥ आदि अन्त्य छैन जसका यस्ता शङ्ख, चक्र तथा गदा धारण गर्ने हे अक्षय्य! हे पुण्डरीकाक्ष! हे भगवन्! प्रेतलाई मुक्ति दिने हुनु हओस् ॥ ४१ ॥ यस्ता प्रकारले श्राद्धका अन्त्यमा दिन-दिनै प्रार्थना मन्त्र पढोस् र स्नान गरेर घर गई गोग्रास दिएर भोजन गरोस् ॥ ४२ ॥

श्रीगरुडपुराणको सारोद्धारमा एकासद अध्याय समाप्त भयो ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मादादिदिनादूर्ध्वं प्राक् सपिण्डीविधानतः। योषितः पुरुषस्यापि प्रेतशब्दं समुच्चरेत् ॥३२॥
प्रथमेऽहनि यत् पिण्डो दीयते विधिपूर्वकम्। तेनैव विधिनान्येन नव पिण्डान् प्रदापयेत् ॥३३॥
नवमे दिवसे चैव सपिण्डैः सकलैर्जनैः। तैलाभ्यङ्गः प्रकर्तव्यो मृतकस्वर्गकाम्यया ॥३४॥
